

अथमासस्तवकेफाल्गुनमासमाहात्म्यप्रारभ्यते·


सूत
शौनक
विष्णु
नार
विष्णु
रेवन्त
गणेश
रुद्राक्षी दे
विष्णु
गणेश
कपि
पिंग
वासे
विश्वा
फल्गुन
केला
शिव
नार
गरुड
उलूक
ब्रह्मादे


पूजा
ग
स्त्री
कपिल
वराह
यम
अप्सरा
जावालि ऋ
पिशाच
होलीपूजन
होलासुरदैत्य
वध
नारद
शिव
शिव
होलि
विष्णु
मातृरूपि
सुदर्शना
नृत्यक्रीडा

# अथ फाल्गुनमासमाहात्म्यविषयानुक्रमणिका·




| अध्याय | विषय |
|---|---|
| १ | शौनकप्रश्नेनसूतस्यकथारंभः दुःखितजनानूद्धर्तुं बरुणासहनारदस्यवैकुंठगमनंतत्रनारदविष्णुसंवादेसर्वदुःखोपशांत्यैकुंभसंक्रांतौफल्गुस्नानमतिपादनं· श्लोकाः ४० |
| २ | फाल्गुनेफल्गुस्नानकिमर्थमितिप्रश्नेगयासुरकथारंभः तत्रगयासुरप्रपीडितदेवरुतविष्णुस्तवेनततः विष्णोर्वचनेनइंद्रस्यगयासुरंप्रतिगमनंतत्रेंद्रस्यपलायनंततः गयासुरसेनापतिनालोहदंडेनसहदेवानां महायुद्धं ५८ |
| ३ | ततोगयासुरेणसहविष्णोर्महायुद्धं तत्रगंडकीशिलारूपीविष्णोरनेकस्वरूपोत्पत्तिः ततःगयासुरस्तुतविष्णुस्तवनंविष्णोर्वरदानेनगयापुरनिर्माणंपुनःपुनःनवयुत्पत्तिः फल्गुनयुत्पत्तिः अक्षय्यवटप्रशंसा· श्लो· ६१ |
| ४ | गयायांवटरूपेणब्रह्मणःस्थितेः कारणंगयाक्षेत्रस्यत्रिसंध्यातीर्थमहिमा· श्लो· ५७ |
| ५ | फाल्गुनेफल्गुस्नानमहिमा· श्लो·५२. |
| ६ | स्नानविधिकथनंतत्रकपिंजलपिशंजलकथानिष्कामित्रवसिष्ठयोर्विरोधः श्लो० ५६ |
| ७ | फाल्गुनेदानविधिस्तत्फलंच· श्लो० ५९ |
| ८ | फाल्गुनमाहात्म्यंप्रकाशयितुंभुविहिंजरूपेणनारदस्यपरिभ्रमणंतदाफल्गुस्नानादिनालोकेनिरोगेसतिधमस्यशिवाराधनंतदानारदंहंतुंशिवेनत्रिशूलंप्रेषितुंत्रिशूलभयान्नारदस्यवैकुंठगमनंततोशिवक्रोधशांत्यर्थं शिवारूपेणशिवंप्रतिविष्णोर्गमनंततःफल्गोरंतस्तोयात्मकःशिवस्यशापः शिवस्त्वंदिगंबरोभवेतिफल्गोः शाप० श्लो० ६७ |
| ९ | फल्गुफाल्गुनमाहात्म्येनष्टेपुनः नारदस्यकैलासगमनंतत्रनारदवाक्येननृगोपक्षिरूपेणस्थितिःततःशिवभयाच्छुकरूपस्यतुंबरोःसत्यवत्योदरेप्रवेशः सएवशुकयोगींद्रः श्लो०४६ |
| १० | मनःशुद्ध्यर्थनारदोपदेशतः पृथोःफल्गुतीरेफाल्गुनव्रताचरणं· श्लो· १०७ |
| ११ | फाल्गुनमाहात्म्यश्रुतिकरणेकारणं लंबकर्णस्यवरदानं तेनराहोःसंयोगः श्लो० ३३ |
| १२ | राहोर्वचनेनब्रह्माणंहंतुंलंबकर्णस्यसत्यलोकगमनं श्लो०३५ |
| १३ | लंबकर्णभयात्ब्रह्मादीनांजलमध्येनिवासः |
| १४ | अनेकविधदानानिराधोगोपालयोर्धात्रीमूलेपूजा· श्लो० २९ |
| १५ | देवरुतविष्णुस्तोत्रंस्तोत्रानुष्ठानंच· श्लो·२८ |
| १६ | लंबकर्णदैत्यनाशार्थं मायातपोवननिर्माणं तत्रकपिंजलब्रह्मर्षेर्निवासः श्लो·३१ |
| १७ | कपिंजलभार्याहरणनिमित्तेनलंबकर्णस्यनाशः तत्सैन्यनाशश्च· श्लो०२८ |
| १८ | यमवचनेनफाल्गुनमाहात्म्यश्रुतिकरणार्थंमायास्त्रीणांनिर्माणं· श्लो २८ |
| १९ | फाल्गुनव्रतेननजावालेपिशाचयोनिसकाशा |

नुक्रमः श्लोकाः २५
२० भद्रायांहोलिकादीपने ग्रामनाशः तत्रनृसिंह भूपकथा· श्लो० २६
२१ होलिकाव्रतकथनार्थं होलाकराख्यानं होलाकरकन्योत्पत्तिः श्लो० २८
२२ होलाकरदिग्जयः श्लो० ३०
२३ हुताशनीदेव्युत्पत्तिः ततःस्वभगरूपाभवेतिशुक्रशापः शिवरात्रिनामप्रयोजनव्रतपूजाचरशिवस्यचंडगणोत्पत्तिः श्लो० १००
२४ होलिकाविवाहः ततस्तस्यात्यागः ततेनारदहोलिकासमागमः नारदोपदेशतः होलिकानुकरणं· श्लो० ३३
२५ होलाकरदैत्यदूतस्यवैकुंठगमनं· श्लो० ३०
२६ होलाकरसैन्यवधः होलासुरस्ययुद्धार्थंवैकुंठगमनं तत्रहोलाकरस्यवधेजातेतत्शीर्षेतपोनिष्ठितायाः होलिकायाः करेपतितं· ततो· होलिकायाः विष्णुनासहयुद्धं· श्लो० ६०
२७ पराजितायाः होलिकायाः स्मरणाच्चिरंजीवभावः ततोवरप्राप्तिःफाल्गुनपौर्णमास्यांहुताशनेहोलिकादेहदहनं· माघपौर्णिमारभ्यफाल्गुनपौर्णिमापर्यंतंनृणांरात्रौरुत्यं होलिकादीपने भूमानं होलिकाप्रतिमाकरणं· श्लो· ३२
२८ होलिकापूजामंत्रादिकथनं· श्लो० २४
२९ होलिकापरेहनि भस्मवंदनविधानंगोपीगीतमाहात्म्यधूलिवंदनाकरणेदोषः तद्दिनेदेशांतरगमनेनमरणंकथाच· श्लो० ३१
३० विरूपनृपकथा· श्लो० २९
३१ फाल्गुनकृष्णपक्षेधूलीव्रतपंचकं कदर्शननृपकथा· श्लो० २९
३२ सुदर्शनगालवसंवादेविष्णुस्तवनं· श्लो० ३३
३३ फाल्गुनपौर्णिमायांचाग्निव्रतंतद्विधिश्च· ३३
३४ धूलिव्रतसांगतार्थं अवभृथस्नानविधिः तन्नवाषीलक्षणं सोमदत्तविप्रकथा श्लो· ३१
३५ धूलिव्रतनिंदादोषशांत्यर्थंगणपतिव्रतं ३३
३६ फाल्गुनशुक्लषष्ठीमारभ्यदशाह्निकव्रतंतद्विधिः पंचोपास्कानांपंचायतनपूजाविधिः ३२
३७ नटनृत्यावलोकनविधिः मगधनृपकथा· श्लोकाः ४६
३८ होलिकाव्रतविधानंतद्व्रतेतज्जारदोषाभिधत्तिः श्लोकाः ३४
३९ अष्टादशपुराणश्रवणमहिमाकथनं सुबुद्धबुधकथानकं· श्लो० २९

इतिफाल्गुनमासमाहात्म्यानुक्रमणिका·


इतिफाल्गुनमासमाहात्म्यानुक्रमणिका समाप्ता·

श्रीगणेशायनमः शौनकउवाच साधुसाधुमहाप्राज्ञसर्वज्ञवदतांवर त्वत्प्रसादेनदेवेशसर्वलोकोपकारकं १ श्रुतंमा
घस्यमाहात्म्यमकरस्थेदिवाकरे प्रयागेसमनुप्राप्तेनालंतृप्तेमनप्रभो २ अनोहंश्रोतुमिच्छामिमाहात्म्यंफाल्गुनस्यच सूतउवा
च साधुपृष्टंमहाभागप्राणिनांहितकारकं ३ नालंवर्णयितुंशक्योमहिमाफाल्गुनस्यच. यस्माच्छिवेनप्रच्छोममानुग्रहमिच्छ
ता ४ गतेबहुतिथेकालेदेवाच्छब्यशृंगकेनच शृंगान्मयाश्रुतकिंचित्परमद्यापिगोपित ५ नवभक्त्यावशीभूतःकथयिष्याम्य
तोनघ शौनकउवाच सूतसूतमहाभागसर्वमाख्यातुमर्हसि ६ कस्मान्नगोपितवान्शंभुःप्रेतराजरुपावशः पुनःकथित
वान्कस्मात्कथंलब्धंशृंगकेनच ७ एतत्सर्वंसमासेनसंनिधासेनवापुनः कथयस्वविदांश्रेष्ठयदितेस्यात्कृपामयि ८ सूतउ
पुराकलियुगेघोरेवर्तमानेजनार्दने स्वेच्छयाब्रह्मतनुजोनारदस्तुंबरोःसह ९ मृत्युलोकंसमासाद्यभ्रममाणइतस्ततः द
दर्शजनसंघाताः शोकसंविग्नमानसाः १० अनपत्याम्रृतापत्याव्यपत्यकलहाकुलाः मृतस्त्रीकाबहुस्त्रीकानिःस्त्रीकाःस्त्री
जिनास्तथा ११ पाकलापतयश्चान्येभृत्याधीनास्तथापरे क्षिप्रापस्पाररोगार्ताःकुष्ठाद्यादशभिर्हृताः एतादृशान्जनान्वी
क्ष्यतुंबरुःप्राहनारदम् १२ तुंबरुरुवाच सचेल्लुपार्द्रत्वदृयःकरिष्यतिजगल्लुपां भविष्यतितदासर्वंयत्नेमनसिवर्तते १३
एवंतुंबरुवाक्यानेदुःखसंविग्नमानसः वैकुंठंप्रययौक्षिप्रंनारदोगगनाध्वना १४ ददर्शवैष्णवंधामशंखचक्रगदाधरं पीतां
बरपरीधानंवनमालाविभूषितं १५ श्रीवत्साकितवक्षःश्रीनिवासंपक्षिवाहनं तुलसीकोमलदलमालाभूषितकंधरं १६ किं
रीटकुंडलधरंवैजयंत्यालसद्बलं चतुर्भुजंघनश्यामंपुंडरीकनिभेक्षणं १७ सेवितंलोकपालाद्यैर्गीतंचित्ररथादिभिः स्तूयमा
नंश्रुतिभिः सांगैश्चवेदैर्विग्रहधारिभिः १८ गंधर्वाप्सरसैर्यक्षैःकिन्नरैरथचारणैः ऋषिभिर्बहुभिश्चान्यैः कपिलाद्यैर्महात्मभि
१९ प्रणम्यदंडवद्भूमौकृतांजलिरभाषत जयनित्यपरानंदजगद्योनेपरावर २० नमस्तेभूतभव्येशछंदसांपतयेनमः तुभ्यं
नमस्त्रयीमूर्तेगुणानीनायतेनमः २१ गोलोकवासिनेतुभ्यंगोपालायनमोनमः भक्तार्तिनाशिनेतुभ्यंदुःखदावाग्निनाशि

द २२ स्कत्वैवंदेवदेवेशंमाधवंकरुणानिधिं तूष्णींबभूवधर्मात्मानारदोवदतांवर २३ तंदृष्ट्वाशोकसंविग्नंनष्टसारं-
विदुषांवरं ग्रहस्योवाचभगवान्सर्वभूताशयस्थितः २४ किमर्थंम्लानवदनःकस्माच्चिंतासमागता निस्पृहस्यतवा-
प्यद्यग्रहोचित्राविधेर्गतिः २५ एवंपितामहवचःश्रुत्वोवाचपुनर्वचः नारदउवाच नमेचिंतानमेदुःखंत्वत्प्रसादेनकेशा
व २६ परंदृष्टंमयातानमर्त्यलोकेरुपीडनं शूलैःप्रमेहातिसारैस्त्रिदोषैश्वज्वरैर्युताः २७ एवरोगैश्वबहुभिःपीडिता
भृशदुःखिताः तथाकाणाश्चबधिराःकुब्जाःश्वांधाश्चपंगवः २८ महारोगहताश्चान्येदरिद्रानित्यसेवकाः ऋणग्र-
स्ताश्चहीनांगा स्तथैवान्येप्रवासिनः २९ बुभुक्षिताःपिपासंतेभ्रमंतश्चइतस्ततः अनावृष्त्यानिवृष्त्याचशलभैर्मूषकैः
शुकैः ३० पीडिताःपरचक्रेणस्वचक्रेणतथापुनः तथैवचनिनादृष्टाःश्राविण्योमृतवत्सकाः ३१ एकापत्यास्त्र्यपत्या-
श्चऋतुहीनाःसदार्तवाः व्याधिभिर्व्याधिभिश्चान्यैर्जगत्सर्वंसदुःखितम् एवंबहुविधंदृष्ट्वादुःखसंविग्नमानसः ३२
तस्यदुःखेनदेवेशदुःखितोहंनसंशयः तस्यक्लेशविनाशार्थमागतोस्मितवांतिके ३३ सर्वस्यार्तिहरोनित्यंयतस्त्वंक्ले
शनाशनः पोषकःसर्वलोकस्यस्वयंपालयितावि भुः ३४ नारदीयंवचःश्रुत्वात्वष्टोवैपरमःपुमान् उवाचमधुरंवाक्य
नारदंप्रतिचादरात् ३५ श्रीभगवानुवाच शृणुनारदभद्रंतेसर्वलोकोपकारक फाल्गोश्चस्नानमाहात्म्यंकुंभसंस्थे-
दिवाकरे ३६ स्नानदानंजपोहोमस्तर्पणंद्विजपूजनं गदाधरस्यदेवस्यपूजनंचयथोदितं ३७ सर्वदुःखोपशमनंमहा
पातकनाशनम् यःकरोतिनरोभक्त्यासर्वपापात्प्रमुच्यते ३८ प्राप्नोतिपरमंसौख्यंइहलोकेपरत्रच भुक्त्वाचविविधा
नभोगानंतेसायुज्यमाप्नुयात् ३९ इतिश्रीभविष्योत्तरपुराणेतपस्यमाहात्म्येप्रथमोऽध्यायः १ ॐ नारदउ०
किमर्थंफाल्गुनेमासिफल्गुस्नानंमहाफलं गदाधरस्यदेवस्यकिमर्थंतत्पूजनं १ कैरिदंतुपुराचीर्णंकथयस्वेतिहास-
तः श्रीभगवानुवाच शृणुष्वावहितोब्रह्मन् इतिहासंपुरातनं २ अप्रकाश्यमनिर्वाच्यंकथयामिसमासतः तवस्तु

निवशीभूतोध्यानेनब्रह्मनंदन ३ पुरागयासुरोदैत्यस्तपस्तेपेसुदारुणं शंभुप्रसादानमरानजयत्सकलानपि ४ अव
ध्यः सर्वभूतानामजेयस्त्रिदशैरपि जित्वाचसकलान्देवान्लोकपालान्ग्रहानपि ५ स्वभृत्यान्स्थापयामासन्त्रधिका
रेदिवौकसां स्वयमग्निःस्वयंवायुःसूर्यश्चंद्रमसौस्वयम् ६ स्वयमिंद्रश्चवरुणःकुबेरोग्रहनायकाः एवंतेनजिताःसर्वेन्त्र
मराःक्षीरशायिनं ७ ऋषिभिःसहिताजग्मुःकेशवंक्लेशनाशनं योगमायासमाक्रांतदृष्ट्वैवंद्रपुरोगमाः ८ नालंप्रबोधि
तुशक्ताभूशमुद्विग्नमानसाः मिथोविचारयामासुःकपिलाद्यामहर्षयः ९ स्तुतिप्रियोदेवदेवःश्रुतोदृष्टोप्यनेकथा इति
कृत्वामतिंदेवाविष्णुस्तोतुप्रचक्रमुः १० देवाऊचुः जयनित्यपरानंदविश्वयोनेजगत्पते गुणातीतनिराभासजयब्र
ह्मेंद्रपूजित ११ क्षीराब्धिशायिनेतुभ्यंनमस्तेदनुजांतक नमस्तेजगतामीशसर्वक्लेशनिषूदन १२ पाहिपाहिजगद्वि
श्वंपीडितंदनुजाधिपैः त्वदन्योनास्तिनस्त्राताअतस्त्वांशरणंगताः १३ नमस्तेस्तुहृषीकेशजगत्पालकचाव्यय चि
त्स्वरूपनिजावासयोगिहृत्पद्मसंस्थित १४ नमःसहस्त्रशीर्षायसहस्त्राक्षायतेनमः सहस्त्रबाहवेतुभ्यंनमस्तेय
ज्ञसाधन १५ यज्ञायय्ज्ञरूपायययज्ञानांफलदायिने तुभ्यंसहस्त्रपादायनमस्तेविश्वपालक १६ कृदर्शनेननः पाहि
पाहिशार्ङ्गिणमाधव श्रमणेनचपद्मस्यत्राहिदानवजाद्भयात् इतिसंस्तूयमानानांदेवानांदुःखकर्शिनां १७ आविरासी
त्परानंदः स्तवेनानेनतोषितः उवाचकृप्रसन्नात्माकिमर्थमिहचागताः १८ किमर्थंम्लानवदनाः कारणंब्रूतसत्वरम् ।
देवाऊचुः त्रिकालज्ञोसिभगवन्सर्वज्ञास्यसितत्वतः १९ परंब्रुवामःसकलंश्रूयतानवकेशव गयासुरोमहादैत्यस्त्रै
लोक्येपरमेश्वर २० राजानोविजिताःसर्वेयक्षरक्षासिदानवाः देवाश्चापिमहेंद्राद्याजितास्थानाद्बहिष्कृताः २१ देवदै
त्यमनुष्याणांस्वर्गपातालवासिनां अधिकारेषुविन्यस्ताःस्वकीयाएवसर्वशः २२ किंपुनर्बहुनोक्तेनजीवशेषाःसमा
गनाः उत्पत्तिस्थितिसंहारान्यःकरोतिस्वलीलया २३ शयालुत्वात्तवविभोअस्माकमिहकागतिः निद्रयाव्याकुला

येचतेहताःस्वयमेवहि २४ सर्वदानिद्रितोसित्वमतोदुःखस्यभागिनः देवानांगिरमाकर्ण्यप्रहस्यत्रिदशेश्वरः २५ प्रोवाच
मधुरंवाक्यंजगदानंदकारकम् विदितंवोमयासर्वंगयासुरविचेष्टितं २६ ननिद्रितोवाजागर्मिसांप्रतंत्वेनस्थितोस्म्यहं
नस्योच्छेदंकरिष्यामिशौवैरपिवरेर्युनः २७ देवानाश्वासयामासमहेंद्रंवाक्यमब्रवीत् दूतत्वंगच्छमघवन्नुपार्श्वेतस्यगयस्य
च २८ दूतोहंप्रेषितस्तेननवार्तिकमुपागतः त्यजस्वेंद्रपदंशीघ्रंपातालंयाहिसांप्रतं २९ इत्याज्ञापयतेविष्णुरितिब्रूहिग-
यासुरं सूतउवाच इत्यंश्रीहरिणादिष्टोजगामेंद्रस्तदास्पदं ३० दृष्ट्वातंस्वपदारूढंगंधर्वाप्सरसेवितं भ्रांतःकोपीमहेंद्रो
पिननामस्वामिनंयथा ३१ कोसित्वंमितिसंपृष्टःकथयामासचात्मनः भगवन्देवदेवस्यविष्णोर्नारायणस्यच ३२ दूतो-
हंप्रेषितस्तेनतवांतिकमुपागतः त्यजस्वेंद्रपदंशीघ्रंपातालंयार्हिसांप्रतं ३३ ममभक्तोसिवात्सल्यात्क्षमापराधाहिभूरिशः
क्षमिताःप्रीतिभावेननिद्रितेनाथवापुनः ३४ जाग्रतोहमतोयाहिपरिवारेणसंयुतः नोचेदेकेनबाणेनप्रेषयामियमांतिकं
३५ इतिदूतवचःश्रुत्वाकोपप्रस्फुरिताधरः ध्रियतांयोब्रवीद्वाक्यंरक्तनेत्रोद्यतायुधः ३६ पलायमानंदेवेशंधृत्वापादेव्य-
क्षिपन् भ्रामयित्वादशादिशः क्षीराब्धौमाधवांतिके ३७ ततस्याह्वयसेनान्यंलोहदंष्ट्रत्रिलोचनं तिस्रः कोट्योर्धकोटींच
रथवाजिपदातिनां ३८ नागानांभद्रजातीनांदत्वादिव्यायुधानिच युद्धायप्रेषयामासक्षीराब्धौशेषशायिनं ३९ गयास्त-
रकराद्धृष्टः शक्रोब्धौश्रीशसन्निधौ विशीर्णगात्रःसहसापक्वंशिंशुफलंतथा ४० पपातभयदःसर्वान्गतासूंश्चस्करान्ऋषी-
न् अहोकिमेतत्सांप्रतंकिंवादैत्येनपातितं ४१ एवंविचार्यमाणस्तैर्बुद्धःकृच्छ्राच्छचीपतिः सर्वेशंकथयामासकर्वज्रपा-
णिरमांदशाम् ४२ धन्वंतरिंसमाहूयशक्रंसंप्रेषयन्प्रभुः शक्रंसजीवयामाससंजीविन्यामृतेनच ४३ देवंप्रणम्यविधि
वद्वृत्तांतंतन्यवेदयत् वदंतीत्यमघवतीश्रुत्वोदुंदुभिनिस्वनः ४४ ज्ञात्वादूतमुखात्सर्वंशत्रुसेनासमागमम् स्वसेनांकस्प
यामासपरसैन्यविनाशिनीं ४५ पंचवक्त्रांचदुर्वक्त्रांषण्मुखांद्वादशाननां दशाननां कुंभकर्णांशतास्यांशतकर्णिकां ४६

व्याघ्रास्याः कुंजरास्याश्चहयग्रीवाः खरानानाः उष्ट्रास्याः पक्षिवदनाः सर्पास्यामहिषाननाः ४७ एवंविनिर्मितास्तेनगणाः शतसहस्रशः शस्त्रास्त्रधारिणः सर्वेसर्वेयुद्धविशारदाः ४८ सर्वेतेवाहनारूढाः कृतांतइवदुःसहाः दध्नुर्वाद्यान्यनेकानिदिव्यानिरुक्मभांत्यपि ४९ आत्तयादेवदेवस्यनिजघ्नुःपरसैनिकान् रथीरथंसमासाद्यअश्वसाद्यश्वसादिनं ५० यत्नागजस्ययंतारंअंकुशैःसमयुद्धयत एवंद्वंद्वंसमभवत्सदानिस्तुपदातिनं ५१ कदाचिद्देवसैन्येनदैत्यसैन्यंपराजितं निरीक्ष्यलोहदंष्ट्रोथस्वयंयुद्धायनिर्ययौ ५२ ववर्षशरसंघानवर्षाकालेघनोयथा शरैःसंपूरयामासधरणीगगनांतरं ५३ हस्त्यश्वारथिनोयोधानचलंतिद्दतस्ततः सर्वेचित्रध्वजाएवशरजालेनपूरिताः ५४ बभुःसर्वेशरगणाःपंजरस्थाःशकाइव नवेपलायितुं शक्ताः हाहाशब्दमभूत्तदा ५५ विलोक्यभगवान्विष्णुर्वन्ह्यस्त्रंसमयोजयत् दग्धंसर्वंनदातेनशस्त्रसंभववन्हिना ५६ अमृतंवर्षयामासस्वसैन्येकमलेक्षणः वन्हिधौतंपथास्वर्णंतथैवबभौबलं ५७ पूर्वस्मादधिकंजातंबुद्धिवीर्यबलान्वितं ५८ इतिश्रीभ॰ फाल्गुनमा॰ द्वितीयोध्यायः २ ७ नारदउवाच किमकारितंतस्तेनलोहदंष्ट्रेणमानिना दग्धेषुसर्वसैन्येषुगजवाजिरथेषुच १ श्रीभगवानुवाच लोहावशिष्टःसमरेदग्धश्मश्रुनखत्वचः पन्थाजगामचैकाकीशंसितुंदेवचेष्टितं २ तंतथाविधमालोक्यशंसमानंपराभवं क्रोधरक्तेक्षणोदैत्यःखड्गेनहंतवानरुषा ३ स्वयंचम्लानवदनस्तूष्णीमासगयासकः ध्यात्वामुहूर्तसकलानाहूयनिजसैनिकान् ४ ददौरत्नानितेभ्यश्चगजवाजिरथानपि सन्नद्धाचाहिनींरुध्वायथौयुद्धायसत्वरं ५ यत्रास्तेभगवान्विष्णुस्तत्रयातःस्वयंतदा सदुधेशातसरव्याकान्बाणान्सूर्यसमप्रभान् ६ चिच्छेदभगवान्सर्वान्बाणानाशीविषोपमान् ततइंद्रःसमभ्येत्ययोद्धुदैत्येनसंगरे ७ ऐरावतसमारूढोजयंतेनसमन्वितः दिव्यैर्बाणशतैर्विद्धोत्यक्करोनेवमन्यते ८ पुनर्जघानगदयातोमरेणासिधारया यानिचान्यानिमघवाशस्त्राण्यस्त्राणिचाक्षिपत् ९ आदायतानिसर्वाणिस्वकरेणबलीलया तैरे

वनद्धनुश्छिन्नरथः सारथिनासह १० वज्रमादायहस्तेनअभ्यधावतत्वरा ततः शरसहस्रेणसहस्राक्षिएयपूरयत् ११
विद्धःसहस्रबाणेनविचेष्टोनिपपातह केशेषुमातलिंधृत्वाचिक्षेपनिजमंदिरं १२ त्रिशूलेनातितीक्ष्णेनजयंतोपिनिषातितः एरावतंकल्पतरुहयराजभिषग्वरम् १३ रंभां तिलोत्तमां चान्यान्सरराजगृहेस्थितान् अनीतानिद्रभवनात्तान्सर्वा
न्विगतस्पृहः १४ अविचार्यैवतान्सर्वान्क्षीराब्धौचव्यचिक्षिपत् एवंतेनहताःसर्वेमज्जिताब्धौसमंततः १५ एकोवसिष्टोभगवान्शरवचक्रगदाधरः लक्ष्म्याकेवलयाजुष्टोपश्यन्निस्मइतस्ततः १६ चिक्षेपकमलंहनुं दैत्यंदुष्टमतिंरवलम्
आगतंकमलदृक्षाबलाद्धस्तेनसोद्धौ १७ भ्रामयित्वादशदिशोवायुचक्रेनिवेशितं तदादिकमलोत्पत्तिर्जातासर्वज्ञ
लाशये १८ ततःक्रुद्धःसभगवान्चक्रंचिक्षेपतंरिपुं तदप्यादायहस्तेनप्रक्षिप्तंगंडकीनटे १९ तस्यचक्रस्यसंघर्षात्सर्वा
श्चक्रांकिताःशिलाः अनंताविष्णुरूपास्युर्भुक्तिमुक्तिफलप्रदाः २० ततःकोपेनमहताद्ध्मौशंखंमृतापवान् श्रुत्वैवशं
खनिनदंकोपप्रस्फुरिताधरः २१ बलाद्गृहीत्वातच्छंखंपारावारेपरिक्षिपत् तद्गृयादचलालक्ष्मीर्विष्णुत्यक्ताप्यपीपल्न् २२ नलेभेनिर्भयस्थानमतोसागरमाविशत् तदैकाकीसभगवान्गदापाणिर्महौजसा २३ सशापलक्ष्मीचरुषा
चंचलात्वंभविष्यसि ततःसमभवद्युद्धंहयोरपिहयोरिव २४ दिव्यवर्षसहस्राणिबाहुप्रहरणोद्यतौ नातिम्लानौ
नसंत्रष्टौयुद्ध्यमानौदिवानिशम् २५ ततःकतिपयैःकालैःक्षीणशक्तिर्गयोभवत् पन्द्यामाक्रम्यतद्गात्रंगदयाताडितोभृशम् २६ तथापिप्राणान्नजहौप्रसादाच्छूलपाणिनः गदाघातविनिर्भिन्नगात्रक्लेशेनदुःखितः २७ नप्रापशरणंकंचिद्विष्णुस्तोनुप्रचक्रमे दैत्यउवाच शिवेवरेण्यंपुरुषपुरातनंसनातनंकारणकारणानाम् विश्वस्ययोनिंप्रकृतेः परात्परत्वांबीजभूतंशरणंप्रपद्ये २८ ब्रह्मोपेंद्रोयेचसाध्यादियक्षारुद्रादित्यालोकपालाःस्वरेशाः मोहाविष्टानेवजानंतितत्वंत्वांबीजभूतंशरणंप्रपद्ये २९ ध्यानैर्योगैःसाधनैर्योगिनोपिवेदैःशास्त्रैर्नैवजानंतिरूपं भ्रमंतिचान्येगिरिगव्हरे-

षुत्वांविश्वयोनिंशरणंप्रपद्ये ३० कृतापराधोस्मिजगन्निवासमांत्राहित्राहिशरणागतोहं कृपानिधेमेऽपराधंक्षमस्वयत-
स्त्वाहंशरणागतोस्मि ३१ स्तुत्वैवंदेवदेवेशंगदापाणिमधोक्षजं हस्ताभ्यांचरणौगृह्यनेत्राभ्यामश्रुजज्जलं ३२ कृपासमु-
द्रोभगवान्परेशोवरंवृणीष्वेतिकृतागसाय ऊचेप्रसन्नःप्रणतायतस्मैसंस्पृश्यगात्रंकृपयाकरेण ३३ हरिरु० वव्योसि
त्वंमयाचाद्यपरस्कृतिविमोहितः प्रीतोस्मितेभावेनदास्यामितवकांक्षितं ३४ इदंहित्वात्रपरमंपवित्रंदृष्ट्वावसानेमनुजा
पठंति नेमृत्युबाधांसहसाविहायमोदंतिपुत्रैश्चममप्रसादात् ३५ मृतश्चेन्मोक्षमाप्नोतिमत्प्रसादान्नसंशयः ममप्रीति
करंस्तोत्रंसर्वंसंपत्प्रदंनृणां ३६ तेपीयवैष्णवीवाणींश्रुत्वोवाचगयासुरः नयाचेऽन्यमनुत्तंवामोक्षंगदाधर ३७ त्वत्पा
दाब्जंशिरोदेशेयाचेहंममसर्वदा अन्यंवरंवरिष्यामिदेहित्वभुवनेश्वर ३८ देशोयंकीकटःपापोनराणांदुर्गतिप्रदः तत्राहं
पतितोयस्मात्तस्मात्वंकुरुकेशव ३९ मच्चामनगररम्यंसर्वतीर्थैरलंकृतं भुक्तिमुक्तिप्रदंनृणांपितॄणांतृप्तिकारकं ४० त
थेत्युक्ताभगवताक्रोशमात्रेगयाशिरे दत्वाचैकंपदरम्यंतन्नाम्नीमकरोत्पुरीम् ४१ सागयेतिचविख्यातात्रिषुलोकेषुवि
श्रुता पंचक्रोशमितासाचपर्वतैःसमलंकृता ४२ एवरम्यंपुरंकृत्वादक्षाश्वत्थंजगत्त्रयं एकेनैवतुचक्रेणसूर्योभ्रमतिनित्य
दा ४३ तथैकेनपदाविष्वंभ्रममाणोजनार्दनः ददर्शदेवान्निश्चेष्टांविशीर्णावयवांस्तथा ४४ प्रविष्टान्सागरेघोरेदश
दिक्षुपलायितान् मृतान्सजीवयामासच्छिन्नान्वैपाणिनास्पृशन् ४५ अर्द्धेनिष्काशयामासप्रभावेणपुनः पुनः तत्र
जातानदीरम्यास्नानान्मोक्षप्रदायिनी ४६ पुनःपुनेतिविख्यातापितॄणांतृप्तिदायिनी ततःपंचामृतस्नानं दत्वास्नानाश्च
चक्रिरे ४७ सर्वतीर्थमयंतोयंस्थितंब्रह्मकमंडलौ तेनैवस्नपनंचक्रुःसूक्तैर्वेदसमुद्भवैः ४८ तत्रैकनदीजातापंचामृत-
जलाविला विष्णोःसर्वांगसंभूताफलेनगुरुणायुता ४९ नाम्नाफल्गुरितिख्याताविषुलोकेषुविश्रुता फल्गुतीर्थंतुयःस्नात्वा
दृष्ट्वादेवंगदाधरं ५० फाल्गुनेसमनुप्राप्तेनतस्यपुनरागमः एवंसाफाल्गुनेमासिफल्गुर्जातामहानदी ५१ अमितायांतृतीया

यांमध्यान्हेरविमंडले नदास्नानेनदानेनपूजनेनजगद्गुरोः ५२ मुच्यतेसर्वपापेभ्योब्रह्मसायुज्यमाप्नुयात् पूजयित्वा
विधानेनस्तुत्वाजस्वासमाहिताः ५३ आज्ञामादायतेसर्वेस्वाधिकारान्ययापुरा चक्रुःप्रसन्नवदनाः शांताविनिहतारः
यः ५४ यानिचान्यानिरत्नानिचाहौंषध्यानिसर्वशः तस्मात्तौमथितव्याब्धिःपुनर्लब्धानितानिवै ५५ अशेनदेवनाःस
वास्तीर्थानिविधिधानिच क्षेत्राण्यपितुसर्वाणिआगतानिवसांनिच ५६ ब्रह्मापिवटरूपेणास्थितःशर्वस्यसन्निधौ
वटच्छायेनिसाप्रोक्ताअक्षय्यफलदायिनी ५७ पितृणांपरलोकस्यशासनात्तस्यशूलिनः फाल्गुनेमासिसंप्राप्तेवटच्छा
यांसमाश्रितः ५८ यःकुर्यात्पिंडदानंसपितॄंस्तारयतिध्रुवम् गयायांकिंपुनःप्रोक्तंऋणत्रयविमोचनं ५९ इतिश्रीभ-
विष्णोपु० फाल्गुनमाहात्म्येतृतीयोऽध्यायः ३ ७ नारदउवाच ब्रह्मावटस्वरूपेणाकिमर्थंतत्रसंस्थितः ए
तन्मेकारणंब्रूहिकृपयाधरणीधर १ नारायणउवाच धानाकदाचिदात्मानममन्यतगुरुंच तीर्थयात्राप्रसंगेनपुरीवा
राणसीययौ २ स्नात्वाभागीरथींरम्यांपंचवक्त्रःशिवंययौ निनिंदशंभुसगणंमत्तोवाकृणिभियथा ३ ततःकोपेनम-
हताशिवेननविलोकितः भैरवायददावाज्ञादुष्टोयंहन्यतामिति ४ खड्गमादायहस्तेनयदैकमहरच्छिरः तदाकोला
हलोजातोब्रह्माडेसकलेपिच हाहाकृत्वाप्रधावंतिदेवाइंद्रपुरोगमाः पलायनपरोब्रह्मायत्रतत्रापतच्छिरः ६ क-
पालतीर्थतत्राभूद्वाराणस्यामुनीश्वराः कीकटेषुगतोब्रह्मादुःखार्तोदक्षमाश्रितः ७ उवाहरक्तंबहुधातत्रजातानदी-
शुभा तज्जलस्पर्शमात्रेणरुतंकर्मविनश्यति ८ अतःसाकर्मनाशेतिविख्याताजगतीतले ततोगयासमागम्यविष्ण-
वेतन्न्यवेदयत् ९ पुनर्निंदांचकारोच्चैःशंभोर्मूढविष्णुना शिवेविष्णोचकोभेदोविष्णुःसाक्षाच्छिवःस्वयं १० ब्रह्म
न्निनिंदमायस्यात्तस्मात्वंवटपादपः काकेष्टापूरितोनित्यंपिशाचैः परिवारितः ११ भवत्वममवाक्येनसर्वकर्मबहिष्कृतः
ततः प्रसादयामासविष्णुसत्वस्वरूपिणम् १२ ततःप्रसन्नोभगवानतस्तंब्रह्मयोनिंवटरूपधारिणं उवाचवाक्यंमधुर

हिनायसर्वस्यलोकस्यचराचरस्य १३ येमूलमाश्रित्यजनानृलोके कुर्वंतिकर्माणितवप्रसादात् श्राद्धानियज्ञान्विविधप्र
कारान्दानानिचब्राह्मणभोजनानि १४ तेभुक्तिमुक्तीसहसालभंते मुक्ताभवंत्येवऋणत्रयेभ्यः १५ पूज्योसित्वंसदानृणां
सान्निध्यंममसर्वदा विश्वेशोपितदानत्रयोसांत्यर्थितुंविधिं १६ स्वयमेवावसत्तत्रलिंगरूपधरःप्रभुः देवाःसर्वेतमवस
न्नशेनवदत्तन्निधौ १७ ब्रह्माचतुर्मुखोजातोन्यग्रोधःपूज्यतामयात् न्यग्रोधादक्षिणेभागेतीर्थंमुक्तिप्रदायक १८ मुक्तिद
सर्वजंतूनांस्थितोयत्रकमंडलुः सावित्रीचैवगायत्रीनथैवचसरस्वती १९ तीर्थानितत्रजातानिदिव्यानिस्कमहांतिच त्रि-
कालंतत्रमनुजःस्नात्वासंध्यासमाचरेत् २० यथाक्रमेणविधिवत्तत्फलंशृणुनिश्चितं ब्रह्मघोवाक्करापोवाकृतघ्नोगु
रुतल्पगः २१ मुच्यतेसर्वपापेभ्योब्रह्मनिष्ठोभविष्यति फाल्गुनेसमनुप्राप्तेत्रिसंध्यामाचरेन्नरः २२ शतजन्मभवंहि
प्रोवेदवेदांगपारगः कथयामिकथांदिव्यांपुरावृत्तांनरोत्तम २३ यस्याःश्रवणमात्रेणनरोविगतकल्मषः विशालायांपुरा
कश्चिद्ब्राह्मणोवेदपारगः २४ कुटुंबपोषणार्थायठपायमकरोद्बहो नसलेभेधनंकिंचिद्व्यापारैर्विविधैरपि २५ नदाको
पसमाविष्टः स्तेयवृत्तिमथाकरोत् तस्करैर्बहुभिर्युक्तोजातिभ्रंशकरोभवत् २६ मद्यमांसाशनेदक्तोत्तनवान्बहुशोधन
ब्राह्मणानिहताःकेचिद्भ्रमतापर्वतांतरे २७ क्षत्तागावोहतामर्त्याःबालकाबहवश्चवै परस्त्रियाचापहृताहृतावैभो-
गिनाबलात् २८ एवंदुरत्ययकर्मम्लेच्छैरपिसुदुष्करं चकारपापनिर्भिन्नोधनीजातोहिजाधमः २९ कदापर्यटमानश्च-
स्वभृत्यपरिवारितः धनिकस्यगृहेगच्छन्तद्भृत्यैःसंधतोबलात् ३० निगडेस्थापितोराज्ञाबहुकालंनराधमः कदाचिन्मुक्तः
रुच्छ्रेणपरिवारविवर्जितः ३१ एकाकीभ्रममाणोपिक्षुधयापीडितोभृशं नलेभेचत्रिचतुरैर्दिवसैस्तस्यकर्मणा ३२ बभ-
क्षसकलंमांसंश्वानगर्दभसंभवं तदानद्देवयोगेनब्राह्मणःसमुपागतः ३३ बहुभृत्यगणाकीर्णोबद्धपत्यैरलंकृतः ब
हुदारैःपरिवृतोदिव्यवस्त्रैःस्कभूषितः ३४ दृष्ट्वासरोवररम्यंतत्रस्नानंचकारसः पूजांकृत्वाविधानेनविष्णोरन्नन्यवेद

यत् ३५ विष्णोर्निवेदितान्नेनवैश्वदेवंचकारसः सकांस्यान्नमितिथिंयावत्सनावद्ददौपुरः ३६ अनापृच्छन्कुलंशीलंभोजया मासचाजसा भुक्तानदत्तंपरमंपवित्रंपापनाशनं ३७ मोहाद्भुक्तःसनदाकोभवानितिचाब्रवीत् यत्त्वदन्नेनविमलाजा तामममतिःप्रभो ३८ ब्राह्मण उ० विवेकइतिमेनामगयायांगतुस्तुकः फाल्गुनेफल्गुतःस्नानंत्रिसंध्यंकर्तुमुद्यतः ३९ इतिनद्दत्तनश्रुत्वानमस्कृत्वाद्विजोत्तमं किंफलंफल्गुस्नानस्यत्रिसंध्यायाःफलंकिमु ४० वदस्ववदतांश्रेष्ठकुभोदिन-मणौस्थिते ततःसोकथयत्सर्वमाहात्म्यंफाल्गुनस्यच ४१ त्रिसंध्यायाःफलंतद्वदुर्लभंत्रिदशैरपि कोसित्वंपृच्छतेकस्मा न्नूसत्यंब्रूहिममाग्रतः ४२ सर्वंनिवेदयामासकृतंयद्यच्छुभाशुभम् पुनःप्रणम्यविप्रंतमुवाचकरुणंवचः ४३ पापो हंपापकर्माहंपापात्मापापसंभवः ब्राह्मणांकरुणयाभद्रंद्विजवर्यनमोस्तुते ४४ तमुवाचपुनर्विप्रोयदितेविमलामतिः गयांगच्छमहाभागमासेस्मिन्दैवचोदिते ४५ मासस्नानेत्र्यशक्तस्त्वंफल्गुसंध्यादिकंकुरु तेनैवत्वंविपापःसन्ब्रह्मनिष्ठोभ विष्यसि ४६ पुनरूचेसकरुणंकथंसंध्यांसमाचरेत् द्विजउवाच प्रभातेविमलेस्नात्वासाविच्यामजसन्निधौ ४७ प्रातरौपासनंकृत्वासावित्र्यायुतंजपेत् पूजयित्वापदंविष्णोस्तथैवचगदाधरं ४८ ततोमध्यान्हसमयेगायत्र्यास्नान माचरेत् मध्यान्हिकंसमाप्याथत्रिपदांचतथाजपेत् ४९ तथैवनत्वादेवेशंगच्छेत्तथसरस्वतीं तत्रैवविधिवत्स्नात्वाकृत्वा संध्याजपंपुनः ५० पूजयेच्चैवदेवेशमुपचारैरनेकधा पायसान्नैश्चपक्वान्नैः षड्रसैर्विविधैरपि ५१ नैवेद्यंकल्पयित्वातु ब्रा-ह्मणांश्चैवभोजयेत् ब्रह्मचर्यादिनियमैस्त्रिदिनंतत्समाचरेत् ५२ एतत्तेकथितंसर्वपापानामशनिर्ध्रुवम् त्रिसंध्यायाःस्व-रूपंयत्किमन्यच्छ्रोतुमिच्छसि ५३ विष्णुरुवाच द्विजस्यवचनंश्रुत्वाशनैर्यातोगयापुरीम् सर्वंतत्कृतवांस्तत्रब्राह्मणे नानुमोदितः ५४ बभूवपापनिर्मुक्तोविमानवरमास्थितः दिव्यदेहधरोभूत्वायाद्ब्रह्मपरंपदं ५५ एवंत्वयापिध्यासेनकपिलेन विवस्वता योगिनायाज्ञवल्क्येनतथान्यैर्महर्षिभिः कृतंसंध्यादिकंकर्मयतस्तेयोगिनांवराः ५६ इतिश्रीभविष्यपुराणे-

फाल्गुनमाहात्म्येचतुर्थोऽध्यायः ४ ऋ नारदउवाच श्रुतंमयाभगवनः संध्यायाःफलमुत्कटं अधुनाश्रोतुमि
फल्गुस्नानस्यमाधव १ श्रीभगवानुवाच आसीत्पुराविंध्यदेशेविद्युत्सेनोनराधिपः बहुभृत्यगणाकीर्णः पुत्रदारै-
रनिंदितः २ समुद्रमेखलापृथ्वींशशासैकपुरीमिव मातृवद्योषितःसर्वाःपितृवत्सकलास्तया ३ भ्रातृवत्सुहृदः
सर्वेपुत्रवत्सकलाःप्रजाः पित्रवत्सकलाभृत्याभृत्यवच्छत्रुमंडलं ४ कृतायज्ञाश्चविविधाव्रतानिसबहून्यपि नकोपि
विमुखोजातोयाचकस्तस्यभूपतेः ५ अन्नदानैर्महादानैस्तोषिताभूसुराःपरं बहवःसेनयोनैकदेवतायतनानिच
६ शालाछत्राणिशतशोकूपारामाःसहस्रशः वाप्यःसरांसिकुल्याश्चवृक्षाश्चैवजलाशये ७ एवंसर्वेषुदेशेषुग्रामेषुन-
गरेषुच कृतवान्धर्मतत्वज्ञतत्पत्नीःसेवकैर्वृतः ८ तस्यपुत्रोमहाप्राज्ञःपुंडरीकेतिविश्रुतः जिनवानसगुणैस्तान्परत्वच-
नेस्थितः ९ कदाचिद्दैवयोगेनमृगयायैवनंययौ भ्रमताविपिनेतेनदृष्टःपत्नीमदोद्धतः १० लीलयानट्यकर्तुबाणंधनु
षिसदधे जगामत्वरयाकोलःपृष्ठलग्नोमहीपतिः ११ एवंपलायमानस्यशूकरस्यनृपस्यच सेनावियोगिनीतेनभ्रम-
तिस्मवनांतरे १२ ततस्तुविपिनेघोरेसिंहव्याघ्रसमाकुले हयादुत्तीर्यरभसाद्भूपतिःकालचोदितः १३ क्षुत्तृड्भ्यांपीडि
तोजातोश्रमेणातोविभावसुः तिमिरेणावृतोनित्यंनगत्स्थावरजंगमं १४ तदैकत्वंसमभजद्बलवद्भिर्गुणैर्हियन् ए
वंगाढेंधतमसिएकाकीनृपनंदनः १५ रुग्भावशब्दंघोराणांवेतालानांवनौकसां ददर्शचाथतान्सर्वान्दीपिकापरि
वारितान् १६ भूतान्येतगणांश्चान्यान्दृश्यादृश्यानणून्महान् नग्नान्विरूपान्विकटान्कुत्सितान्घर्घरस्वरान् १७ नाप
श्यशूकरंध्वांक्षेतदानींसव्यचारयत् क्वागतोहक्वगच्छामिकुत्रास्तेममसैनिकाः १८ इतिचिंतानुरोभूत्वावृक्षमूलसमा
श्रयन् निद्रामवापमहतींगिलीतोजगरेणाहा १९ धनुषासहबाणोननकिंचिदवशेषित ततःप्रभातसमयेसैनिका-
विपिनांतरे २० भ्रमतोदृशुर्वेहंतुरंगवृक्षमूलके ततस्तत्पदविन्यासैश्चिन्हिताध्यानमाययुः २१ दृष्ट्वात्वजगरंयो

रंज्ञालातेनैवभक्षितं शोकेनमहताविष्टायातास्तन्नगरंप्रति २२ श्रुत्वातदखिलंराजाशोकमोहसमन्वितः स्वासनात्पति
तोभूमौहाहेतिविलपन्मुहुः २३ आगत्यसात्वयामासुर्मंत्रिणश्चपुरोधसः भवादृशश्चराजानःपंडिताश्चविवेकिनः २४
मृतान्नैवचशोचंतिनदृष्यंतिभवेष्वपि अतस्त्वंविदुषांश्रेष्ठनैवशोचितुमर्हसि २५ विद्युत्सेनोपिमतिमान्तदादेवंविचिंत
यत् त्यक्त्वाशोकंचमोहंचब्राह्मणैरनुमोदितः २६ ततःसकृतवान्राजातस्क्रियांपारलौकिकीम् स्नुषाविवेशदहनंवारि
ताप्यखिलैर्जनैः २७ पतिरेवपरस्त्रीणांधर्मकामार्थमोक्षदः नगतिःपतिहीनानांनारीणामुभयत्रच २८ अतस्त्रीणांपरो
धर्मःपतिरेवसनातनः दत्वादानान्यनेकानिब्राह्मणेभ्योयथाविधि २९ राज्यंदंडंचकोशंचसचिवेषुन्यधिक्षिपत् दा
रैःसहरथारूढोतपोवनमथाविशत् ३० आश्रमादाश्रमंयातःकपिलस्यमहात्मनः बहुपक्षिगणाकीर्णसर्वर्तुफल-
संयुतम् ३१ ददर्शतत्रकपिलंसक्षन्मौनमिवस्थितं ध्याननिष्ठंजिताहारंनिमीलनयनंविभुम् ३२ पपातदंडवद्भूमौक
पिलस्यमहात्मनः ध्यानंविसृज्यसमुनिःकोसिकोसीतिचाब्रवीत् ३३ कस्मादिहागतोसीतिकिंतेकार्यंवदस्वमे तं
नपृष्टोपिनोवाचनोत्तस्थौभृशदुःखितः ३४ पुनःप्रोवाचसमुनिर्ज्ञातंतेदुःखकारणं उत्तिष्ठोत्तिष्ठभद्रंतेमत्प्रसादाद्भ
विष्यति ३५ करुणामृतसंसिक्तंवाक्यंमुनिवरांबुजात् श्रुत्वाचोत्थितवान्राजासंयोज्यकरसंपुटम् ३६ उवाचम-
धुराणींकपिलंमुनिपुंगवम् राजउवाच भगवान्सर्वभूतस्थश्चरमेवयसिस्थितं ३७ कृतवान्केनदोषेणयो-
मादःखस्यभाजनं बाल्येमातृवियोगश्चयौवनेस्त्रीविहीनता ३८ चरमेपुत्रशोकश्चनात्यस्त्यत्रेनसःफलं कथयस्व-
मादुःखात्प्रमोक्ष्यति ३९ कपिलउवाच पुराजन्मनिभोराजन्मेघराजोवणिग्वरः वाराणस्यांचनिव
सन्बंधुभिर्बहुभिर्वृतः ४० धनाढ्योबहुपत्नीकः पुत्रैर्भृत्यैर्विराजितः एवंनिवसतस्तस्यबहुकालोव्यतिक्रमत्
४१ सएकदावणिक्राजन्स्त्रीजितोभूद्विधेर्वशात् नदात्तयाप्रवृत्तेनबांधवानिहतास्तथा ४२ तेषामादायनद्रव्य

भार्ययासहितोमुदा तेनाकार्यणमूहनामृतानीतायमालये ४३ त्यक्त्वातुपितरंपुत्रायानास्तेस्वश्वशुरालये ॥ ८ ॥
हुधनोदुःखितः स्वेनकर्मणा ४४ सर्वस्वंप्रददौविप्रान्काशीस्थान्विमलाशयः ततोदिगंबरोभूत्वातीर्थयात्रांपरिभ्र न
४५ कृत्वातीर्थान्यनेकानिदैवात्पुष्करमागतः तत्रस्नात्वाकतिपयैर्दिवसैर्निधनंगतः ४६ गतोवैकुंठभुवनंस्थित्वाथो
तोपुनर्भवम् नकर्मक्षीयतेभोगैःयापबंधुवधोद्यत ४७ यतस्त्वमसिराजेंद्र पुत्रशोकसमाकुलः अतोयाहिगयाभ-
द्रफल्गुस्नानसमाचर ४८ फाल्गुनेसमनुप्राप्ते पूजयस्वगदाधरं एवंतेननसंदेहस्तवपुत्रोभविष्यति ४९ गृह
ययौराजाकृत्वास्नानंयथाविधि विमुक्तःपातकाद्स्मात्ययौस्वनगरंप्रति ५० शशासससकलांपृथ्वींपुत्रपौत्रादिसं-
युतः अंतेजगामपरमंधामनारायणस्यच ५१ इत्येतत्कथितंसर्वंफल्गुस्नानफलंमहत् ५२ इतिश्रीभविष्यपु०
फाल्गुनमाहात्म्येपंचमोऽध्यायः ५ ॐ नारदउवाच फल्गुस्नानंफाल्गुनेचयत्त्वयाकथितंविभो कथयन्मनु
जैर्लब्धुंशक्यंभवतिकेशव १ श्रीभगवानुवाच फाल्गुनेमासिसंप्राप्तेयत्रकुत्रजलाशये स्नानंविद्ध्यादमल
ब्राह्मेकालेऽजनंदन २ तन्नोदकाद्धरंशीतंशीतात्कूपोदकंवरं कूपाद्दशगुणावापीवाप्याःस्रवातोदकंवरं ३ तस्मा
न्निर्झरजंप्राहुर्निर्झराच्चवरंसरः सरसोपिनदीश्रेष्ठाचतुर्योजनगामिनी ४ तस्याश्चापिवरंतीर्थंतस्मात्सागरगामि
नी तासावरिष्ठाःसप्तैवतभ्यः फल्गुवरास्मृता ५ तस्मात्कलियुगेघोरेपातालंप्रतियास्यति फाल्गुनेसमनुप्राप्ते
सर्वब्रह्ममयंपयः ६ यतस्तस्मिन्स्थितोब्रह्माशासनाज्जगतःप्रभोः तस्मात्सर्वप्रयत्नेनस्नानंकुर्याच्चफाल्गुने ७
ब्राह्मेमुहूर्तेचोत्थायकृत्वाशौचादिकाःक्रियाः स्नानंबहिर्जलेकुर्याद्दंतधावनपूर्वकं ८ शक्तेरभावात्कर्तव्यंस्नानमु
ष्णेनवारिणा कथयामिविधिंतस्यशृणुनारदतत्वतः ९ स्नानोदकेविनिक्षिप्यतिलदर्भशतावरीं पंचामृतानिग
व्यानितथैवतुलसीदलं १० गंगेचयमुनेचेतिमंत्रेणावाह्यमंत्रवित् तथावरुणसूक्तैस्तुपुष्करादीनिचापुनः ११ स

र्वेसमुद्राःसरितस्तथान्यैर्मंत्रयिस्तरैः अभिमंत्र्यजलंसर्वमभिलोड्यपुनःपुनः १२ तिलामलककल्केनमर्दयित्वानिजंवपुः
स्मृत्वानुदेशकालादिकीर्त्यस्नपनंविभो १३ गयागदाधरप्रीत्यैफाल्गुनस्यगतस्मयः अापोहिष्ठेतिसूक्तेनकनिक्रदिति
वापुनः १४ तथैवान्यैःस्वगृह्योक्तैःस्नानसूक्तैर्विचक्षणः मंत्रैःपौराणिकैश्चान्यैःस्नात्वार्घ्यंप्रविदापयेत् १५ नमस्तेगय
फाल्गुनप्रिय नमस्तेस्तुगदापाणेगृहाणार्घ्यंनमोस्तुते १६ कृत्वास्नानंचविधिवद्धौतवस्त्रोत्तरान्वि
तः त्रिपुंड्रधारणंकृत्वापूजयित्वाविधुंमुदा १७ एवंविधंयःस्नपनंकरोतिश्रीफाल्गुनेमासिसमागतेच प्राप्नोतिराज्यं
वैविधांश्चभोगान्फलोःप्रसादात्सकलाघमुक्तः १८ नारदउवाच किमर्थंभगवान्ब्रह्मामासेजलसमाश्रितः
कस्मात्फाल्गुनमासंतुतपस्येतिवदेतिच एतत्कथयमेतानकृपयारिनिषूदन श्रीभगवानुवाच एकार्णवेहिभगवा
न्यदाशेतेबलांतरे २० न्यग्रोधस्यतदाब्रह्मानाभिपद्माद्विनिस्तः कोहंकिमर्थमुत्पन्नोनजस्तेकरवाम्यकिं २१ पृच्छा
मिकंक्वगच्छामिसक्षेतस्मिन्जनार्दने इतिचिंतापरोब्रह्मासक्ष्यावाकाशजागिरं २२ तपस्येतिजलेस्थित्वादिशाश्वस
मलोकयन् नापश्यदपरंकिंचित्तथैवचचकारसः २३ मासमात्रंजलेस्थित्वाध्यात्वादेवगदाधरं जपन्नष्टाक्षरमनुंदिवा
रात्रमतंद्रितः २४ ततःप्रसन्नोभगवान्यत्रान्दात्तुमुपागतः ब्रह्माणंतमुवाचाथकुरुसृष्टिमनेकधा २५ चैत्रेमासिज
गद्ब्रह्मासससर्जप्रथमेहनि व्यतस्कफाल्गुनेमासिपवित्रंसकलंपयः २६ तस्मात्सर्वप्रयत्नेनप्रातःस्नानंविधीयते तं
पस्यइतिनन्नामत्रिषुलोकेषुविश्रुतम् २७ यस्मिन्मासिकृतंयत्तनपोदानंकरार्चनं मासेभ्यश्चैवसर्वेभ्यस्तदनंतगुणं
भवेत् २८ अत्रेदंचर्णयिष्यामिइतिहासपुरातनम् द्राविडेविषयेपूर्वंकुंजरोनामभूपतिः २९ तस्यराज्येवणिक्श्रेष्ठो-
पिशंजलकपिंजलौ समौद्व्येणवयसाविद्ययापिगुणेनच ३० कीर्त्यादिकंपदात्तेपरस्परविरोधिनौ परस्परादृच्छ-
मानौगुरुत्वंयेनकेनवा ३१ इत्येवंस्पर्धमानौतौनालभंतौयदोन्नतिं तदानींपरलोकेचचक्रतुर्मतिमुज्वलां ३२ तदाक

पिंजलोनामवसिष्ठंप्रत्यपद्यत प्रणम्यशिरसाभूमौकृतांजलिरभाषत ३३ कपिंजलउवाच पृच्छामित्वांद्विजश्रेष्ठसर्वधर्मविदांवर केनोपायेनमृतोहंयास्यामिपरमंपदं ३४ वसिष्ठउवाच स्नानंदानंजपोहोमस्तर्पणंद्विजभोजनं पूजनंतीर्थयात्राच यास्यस्येनैःपरंपदं ३५ अहिंसासत्यमक्रोधममात्सर्यमलोभता एतैर्हियुक्तोयदिचेदकापट्यमदंभता ३६ वसिष्ठोदीरितंश्रुत्वाचकेस्नानादिकंनदा दत्वादानान्यनेकानिजस्तामंत्रास्त्वनेकशः ३७ हुत्वायज्ञैश्चविविधैर्देवर्षिपितृमानवान् संतर्प्यभोजयित्वाथद्विजान्संपूज्यदेवताः ३८ कृत्वातीर्थान्यनेकानिसेत्राणिविविधानिच एवंकृतवतस्तस्यबहुकालोव्यतिक्रमत् ३९ पिशंजलोपिनज्ञात्वाईर्ष्याव्याकुलमानसः कथामीतिविचार्यैवंवसिष्ठादधिकोस्मिकः ४० तमद्यशरणंयामिइतिचिंतातुरोयदा पूर्वार्जितेननतपसानारदंसमपश्यत ४१ नामामृतसमायुक्तंयस्येवमुखपंकजम् प्रणम्याकथयत्सर्वमाशयंतस्यनिष्कृतिं ४२ सुणांविचार्यमुनिसिनमुवाचद्विजर्षभः ज्ञातंमेवणिजश्रेष्ठतवदुःखस्यकारणं ४३ विश्वामित्रमिनोयाहिसतेसौख्यंविधास्यति उक्तैवांतर्हितेब्रह्मन्नंदनेतुपिशंजलः ४४ विश्वामित्रंसमासाद्यप्रणम्योवाचभक्तिमान् पिशंजलउवाच अहंपिशंजलोनामसर्वसंपद्युतोपिसन् ४५ कुलेममसमुत्पन्नःकपिंजलइतिश्रुतः तेनसाकंविरोधेनत्यक्तंसौख्यंहिलोकजं ४६ तत्रापिसावसिष्ठेनकृतश्चातेममाधिकः अतस्त्वांशरणंयातोऽनाथोमयिकृपांकुरु ४७ ततःकृपार्द्रहृदयोबभाषेथपिशंजलं॥ विश्वामित्रउवाच कपिंजलायमुनिनावसिष्ठेनकृपावता ४८ उपदिष्टंतुयत्किंचिन्नावशिष्टंव्रतादिकं जपहोमादिकंसर्वंतीर्थयात्रानिषेवणं ४९ परंतेकथयिष्यामियत्तोप्यभुवनत्रये फाल्गुनेमासिसंप्राप्तेस्नानदानादिकंचयत् ५० फल्गोरप्यन्यतीर्थेवातदनंतगुणंभवेत् इतिनद्वचनंश्रुत्वाचकारस्नानमुत्तमं ५१ दत्वादानान्यनेकानिन्यास्यतासंभवानिच एवमासंकृतवतोविमानंदिव्यमागतं ५२ सेवितंअप्सरोभिश्चविष्णुदूतैःसमंततः विमानवरमारुह्यगुरुनत्वायथाविधि ५३ कपिंजलवसिष्ठंचअभिवंद्य- १०

दिवंययौ कपिंजलोपिस्वंदेहमग्नौहुत्वादिवंययौ ५४ तदादिविग्रहोजातोविश्वामित्रवसिष्ठयोः इतिनेकथितंविप्रमाहात्म्यंफाल्गुनस्यच ५५ नातःपरतरंकिंचिल्लिमन्यच्छ्रोतुमिच्छसि ५५ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येषष्ठोऽध्यायः ६ ऋ नारदउवाच कानिदानानिमासेस्मिन्कस्मैवादीयतामिति किंफललभतेमर्त्यस्तत्सर्वंकथयस्व मे १ श्रीभगवानुवाच शय्यादानंभूमिदानंगृहदानमतःपरं तिलदानंचगोदानंतिलधेनुघृतादिकं २ धेनवश्च वृषोत्सर्गऊर्णोपानहवाससी अन्नंपयस्तथाक्षीरधान्यानिविविधानिच ३ शय्यांसालंकृतांकृत्वाछत्रस्तंभादिसंयुतां सपत्नीकद्विजंपूज्यधुवानमुपचारकैः ४ नानालंकरणैवस्त्रैःपक्वान्नैर्विविधैरपि ताबूलंदक्षिणांदद्यात्भोजयेद्द्विजपुंगवान् ५ एवंयःकुरुतेराजन्सइहामुत्रमानवः भुक्त्वेविविधान्भोगानंतेसायुज्यमाप्नुयात् ६ दुःस्वप्नस्त्रीविरहोत्पन्नस्तापोपिसनपश्यति नथैवभूमिदानंचश्रोत्रियायकुटुंबिने ७ वरंवृत्तिकरंदेयंसदृषंबहुदक्षिणं स्वर्णलांगलसंयुक्तंनथैवकृषिसाधनैः ८ योदद्याद्द्विजवर्यायतस्याक्षय्यंपदंभवेत् पुनर्नस्पृशतेभूमिंनात्रकार्याविचारणा ९ गृहदानंप्रवक्ष्यामिदानानामुत्तमोत्तमं तीर्थक्षेत्रेप्रदातव्यंपारंपर्यस्थितायच १० गृहंनिर्मायसुदृढंसर्वलक्षणसंयुतं द्वारद्वययुतंगोभिर्युक्तंदासीसमन्वितं ११ धान्यैर्वस्त्रैःपात्रैरन्यैश्चबहुभिर्युतं सजलपुष्पवृक्षैश्चचतुष्काभ्यांविराजितं १२ येयेचास्तूपयोग्यावैतैस्तैरापूर्यसर्वतः एवंसुशोभितंकृत्वावस्त्रेणपरिवेष्टयेत् १३ ब्राह्मणायप्रदातव्यंश्रोत्रियायकुटुंबिने बहुपुत्रवतेदेयंबहुकालनिवासिने १४ तस्यस्वास्थ्यंप्रकर्तव्यंप्रशक्तेनाब्दमात्रकम् एवंददानियोदानंसचैंद्रपदमश्नुते १५ कश्यपाद्येसमुत्पन्नाहविषांपरमामताः पितृकर्मसुसर्वेषुतिलाएवमताःस्मृताः १६ अभावेसर्वद्रव्याणांतिलाग्राह्यास्तुसर्वतः प्रस्थंतिलानांपात्रेणसुवर्णेनसमन्वितं १७ योददातिशुभेमासेद्विजायवेदवादिने शक्त्यभावेप्रदातव्यंतिलपात्रंसदक्षिणं १८ सयातिब्रह्मसदनंयावच्चैलसहस्रकं गवामंगेषुनिष्ठति-

भुवनानिचनुर्दश १९ अतोनास्तिसमंदानंगोदानस्यमहीतले गोदानस्यविधिंचास्मिंसंक्षेपेणकथंचन २० गवांतास्मावशोक्तास्याः श्वेताऽधिकामता तस्याश्चषड्गुणाकृष्णायदिसाचपयस्विनी २१ तस्यादुग्धंयदिपिबेच्छूद्रश्चाऽडालतांव्रजेत् दानंतस्यास्कयोदद्याच्चणभूमिसमन्वितं २२ स्वर्णशृंगीरौप्यशफांताम्रपृष्ठींचचामरां माणिक्यनयनांनासामौक्तिकांगलघंटिकां २३ ललाटेस्वर्णतिलकांशृंगमध्यप्रवालकां पादनूपुरशोभाढ्यांपंचरत्नविराजितां २४ कास्यदोहनसंयुक्तांवस्त्रयुग्मेनवेष्टितां तथैवभूषयेद्गत्सगंधमाल्यैः प्रपूजयेत् २५ ब्राह्मणंपूजयेद्भक्त्यासाग्निकंसपरिग्रहम् वेदशास्त्रप्रवक्तारंधर्मशास्त्रार्थकोविदं २६ शिरोग्रीवाकर्णकंठ्यांगुलीकाबाहुषु दत्वास्कभूषणान्सघान्वस्त्राणिविविधानिच २७ छत्रोपानहदंडास्कन्यामान्कलशौस्तथा नीरदानेनदानेनब्रह्मलोकोप्यधःकृतः २८ गोलोकंवैसमासाद्यमोदतेकृष्णसन्निधौ तिलधेनुंस्वर्णधेनुंजलधेनुंघृताभिधां २९ मधुधेनुंधान्यधेनुंगुडधेनूरसाभिधां रत्नधेनुंतथासप्तधातुनामपिगास्तथा ३० तथैवभूषितांकृत्वाभूषितायद्विजन्मने योददातिद्विजश्रेष्ठसोपिगोलोकमाविशेत् ३१ मासोस्मिन्फाल्गुनेरम्येनीलंयोवृषमुत्सृजेत् ताम्रावत्सतरोनद्वत्सालंकारायथाविधि ३२ दानानिचतदंगानिदातव्यानिद्विजन्मने वृषोत्सर्गस्यपुण्येनशिवसामीप्यभाग्भवेत् ३३ फाल्गुनेसमनुप्राप्तेऊर्णादानंद्विजातये प्रातःस्नानकृतेनित्यसाभिकायविशेषतः ३४ विष्णुलोकमवाप्नोतियावत्स्यानंतुसख्यया उपानद्दोतुयोदद्यात्सोषितेचाद्विजन्मने ३५ नासौगच्छतिपादेनकदाचिदपिचाध्वनि भुक्तेचविविधान्भोगानंतेशिवपदंव्रजेत् ३६ वस्त्रदानेनसनंतवसूनास्थानमालभेत् दातव्यसर्ववर्णेभ्योब्राह्मणेभ्योविशेषतः ३७ अकिंचनेभ्यऋत्विग्भ्यः सर्वसौख्यासयेसदा ननम्रत्वमवाप्नोतिवस्त्रदानप्रभावतः ३८ अन्नंचषड्रसंस्वादुप्राणिनांजीवनंपरं दातव्यंसर्वजंतूनांभुक्तिमुक्तिप्रदायकं ३९ अन्नदानात्परंदानंनभुतंननिरीक्षितं इहैवसकलान्भोगान्भुक्त्वाब्रह्मसनातनम् ४० अन्नदानपरायस्तुनैवान्नंभुंजतेपुनः

अमरत्वंसदातस्यसोमृतत्वायकल्पते ४१ यतोवदंतिश्रुतयश्चानंत्रह्मेतिनिश्चितं तचास्तिसर्वबीजानांजंतूनांचविशेषतः
४२ जीवनंसर्वकालेषुतस्मान्नान्यत्परमहत् तोयदानेननियमः कस्मैदेयनवापुनः ४३ आपोनारायणःसाक्षाच्चन्नूर्णाम्
पिसंतनं अतोपोजलदानस्यदातावरुणसंभिभः ४४ तत्रैवनिवसत्येषयावच्चंद्रार्कतारकोः क्षीरददातिविप्राणांबालानां-
चविशेषतः ४५ अपुत्रोलभतेपुत्रंसपुत्रःपौत्रमालभेत् धान्यदानंचसर्वेषांप्राणिनांमुद्दातियः ४६ कौबेरींपुरमासाद्य
कुबेरइवराजते एवमन्यानिदानानिदातव्यानिस्वशक्तितः ४७ शक्तेरभावादपिवैकिंचिद्दानंद्विजातये दातव्यंभ-
क्तिभावेननदानंतगुणंभवेत् ४८ श्रीभगवानुवाच पृष्टत्वयायत्सकलंतत्सर्वंकथितंमया नावशिष्टपरंकिंचिद्भक्तो-
सीतियतोमम ४९ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येसप्तमोऽध्यायः ७ ७ सूतउवाच एवंभगवतोवा
क्यंश्रुत्वासंहृष्टमानसः सर्वलोकोपकारार्थंनारदोभूतलंययौ १ धृत्वानुचाडवरूपंमहिमासत्यकाशितः ग्रामेग्रामे
पुरेदेशे देशेदेशांतरेपिच २ प्रकाशयित्वामाहात्म्यंमुनिरंतर्दधेपुनः नदातेमनुजाःसर्वेफाल्गुस्नानायमागताः ३ कृत्वा
स्नानविधानेनदत्वादानान्यनेकशः फाल्गुनेकुंभसंस्थेर्केध्यात्वादेवगदाधरं ४ एवंसर्वव्रतंचक्रुर्नद्यांकूपेजलाशये मा
सस्नानप्रभावेनफलोच्चापिप्रभावतः ५ सर्वेविपापाःसंजातादुःखदारिद्र्यवर्जिताः तथैवरोगरहिताःकारिनोविग
तज्वराः ६ दिव्यंविमानमारुत्यगताःकेचित्परंपदं व्याधिकारास्तदारोगामिथोमत्र्ययभयद्युः ७ नेषांप्रधानायेरोगावान-
पित्तकफादिकाः विषमाःसन्निपाताश्चत्रणिसाराविषूचिकाः ८ भगदराःप्रमेहाश्चयायुःशूलवमिस्तथा क्षयापस्मार
कुष्ठाद्याराजयक्ष्माविचर्चिकाः ९ गलगंडाश्मरीदद्रुःपीनसाःपलितादयः येचान्येबहवोरोगायमलोकनिवासिनः
१० यमाज्ञयाविनश्यंतोययुस्तेपियमालयं प्रणम्यप्रेतराजायरोगाऊचुःपरवचः ११ अहोयममहाबाहोसर्वसत्वनिषूदन
तवाज्ञयावयंयानाःपीडनायधरातले १२ पीडिताबहवोलोकाःप्रेषितास्तवमंडले एवंप्रवर्तमानेतुकश्चिद्विप्रःसमागतः १३

प्रकाशितंधर्मतत्वंसर्वभूतहितायच्च धर्मेप्रवर्तमानेवैसर्वेविगतकल्मषाः १४ रोगहीनादुःखहीनाःसर्वेतेस्वर्गवासिनः अ
न्तःक्षीणबलाजानाक्षयतेशरणागताः १५ नचैवकागतिर्दैवकिंकरिष्यतिसांप्रतं कथंनोनिरयांतस्थाजीवाजीवतिचांतक १६
इतिदुःखाभिभूतास्तेत्युक्त्वास्वभुवनंगताः गतेषुतेषुप्रेतेशश्चित्रगुप्तममब्रवीत् १७ पृष्टवान्लोकचरितमवनीतलसंभव
प्रणम्योवाचमधुरंधर्मराजोद्विजर्षभाः १८ नारदेनकृतंलोकेधर्मसंस्थापनंपुनः सर्वेविपापाःसंजातारोगदुःखविव-
र्जिताः १९ गतारोचैष्णवंधामशैवंब्राह्ममथापिवा नकोपियमलोकेहाफाल्गुनस्यप्रभावतः २० एवंनिगदितेतस्मिन्प्रेत
राजस्यकिंकराः निरस्तावैष्णवैर्दूतैरनाथाइवतेययुः २१ आत्मानंस्वामिनंसेनादैवतेचनिनिंदिरे अलंतेसेवयाजात-
निर्वेदस्यगतायुषः २२ दूतानावचनंश्रुत्वाकोपेनप्रज्वलन्निव अपृच्छेचजगामाशुतपस्तुरुदारुणं २३ स्वर्णशैलसम
साद्यशिवमुद्दिश्यसादरं ज्ञात्वामुकुंदस्यरिपुनारदंचतथाद्विजम् २४ गतेवैवस्वतेराजन्यमलोकनिवासिनः हाहाकृ
त्वाप्रधावतइतश्चेतश्चसर्वतः २५ सापूर्विकवृकीजाताभ्रष्टानष्टास्तदाश्रिताः दिव्यवर्षशतंजातंतप्यमानेकनंदने २६
तदारुद्रश्चभगवानाविरासीज्जगत्पतिः नीलग्रीवश्चसंतुष्टःप्रोवाचमधुरंवचः २७ शिवउवाच उत्तिष्ठोत्तिष्ठभद्रं
तेतपसानेनचारुणा वरंदातुसमायातोयत्तेमनसिवर्तते २८ प्रेतराजोपिनच्छ्रुत्वाशैवंवचनमाहतं विस्मयोत्फुल्लनयनो
ददर्शशिवमव्ययम् २९ पंचवक्त्रंदशभुजंत्रिनेत्रंरूपभध्वजं पार्वतीगणसंयुक्तंत्रिशूलवरधारिणं ३० दिगंबरंशशिधरं
मुंडमालाविभूषितं एवंविधंशिवंदृष्ट्वाप्रणम्योवाचभक्तिमान् ३१ यमउवाच त्रिकालज्ञजगन्नाथत्रिवर्गफलदाय-
क त्वयाविसृष्टाःसकलाब्रह्मविष्णुमहेश्वराः ३२ लोकपालाश्चदिक्पालामन्वाधावसचस्तथा तथैवान्येचबहवोत्रयास्त्रिं
शत्कोटयः ३३ अधिकारेषुविन्यस्तास्त्वयैवविश्वकर्मणा तवाज्ञयाप्रवृत्तस्यदुष्टसंहारकारिणः ३४ ममावज्ञाकृता
नूनंविष्णुनाप्रभविष्णुना नारदेनकृतंसर्वंममकर्मविनाशनं ३५ यतोहंदुःखितोजानेदैवत्वांशरणंगतः यदिमात्वंप्रस

मोसिस्वाधिकारेनियोजय ३६ इतिवैचस्वतंवाक्यंश्रुत्वाक्रोधसमन्वितः त्रिशूलंयोजयामासनारदस्यजिघांसया ३७ शि
वहस्ताद्विनिर्मुक्तस्त्रिशूलोनारदंययौ त्रिशूलमागतंदृष्ट्वामुनिर्विकलमानसः ३८ ब्रह्मलोकंपयौत्पूर्णंदृष्टशूलोभयाकुरः
ब्रह्मापितंसमालोक्यनसशाकनिवारितुं ३९ त्रिशूलतेनसातमाब्रह्मलोकनिवासिनः जग्मुःप्राणभयात्सर्वेयत्रब्रह्मजना
र्दनः ४० वैकुंठेचस्करवासीनंसत्रिशूलोमुनीश्वरः तदाक्रोलाहलोजातोवैकुंठेविष्णुमंदिरे ४१ सिंहासनेप्रचलितोवैकुं
ठेदेवकीसुतः ददर्शतमिमंपौत्रंसत्रिशूलभयाकुलम् ४२ पृष्टवान्किमिदंब्रह्मन्सर्वमाचष्टनारद फल्गुस्नानस्यमा
हात्म्यंश्रुत्वागंगारुषाकुला ४३ हस्तेत्रिशूलमादायशिवाभूत्वाशिवंययौ उवाचपरुषंवाक्यंशंभुंक्रोधारुणेक्षणं ४४
गंगोवाच केयंफल्गुरितिख्याताकथंजातामहाधिका सर्वासामहमेवास्मिगुरुर्नान्यामहाधिका ४५ यतोजगद्धि-
तोस्त्वंसर्वदाशिरसिस्थिता शपेनांयदिमेप्रीतिर्नोचेद्यामियथागतम् ४६ श्रुत्वागंगोदितंवाक्यंशास्त्रतःपरमेश्वरः
गंगाप्रीतिधियाफल्गुंसशापसकलेश्वरः ४७ फल्गूरपियतोतावत्त्रिकालज्ञाशिवांगिकम् दक्षाफल्गुभूतनाथउवाच
मद्गर्वितां ४८ यतस्त्वकृपयाविष्णोःसर्वासामवमन्यसे नदीनांपूर्वजातानांगंगादीनांयथाक्रमं ४९ अतस्त्वंभव
न्युल्लेतिसर्वदाममवाक्यतः उद्धारयंतियेतोयंतेनरादुःखभागिनः ५० फाल्गुनंचशशापाथयमानुग्रहवांछया त्वयि
पौरजनाःसर्वेव्यभिचारादिकाःक्रियाः ५१ मुखावाद्यान्यनेकानितथादुर्भाषणान्यपि अकर्मकारिणःसर्वेवर्णसंक
रकारिणः ५२ भवनिनात्रसंदेहोमद्यपाइवसर्वदा ननःकृद्धाचसाफल्गुःशंभोरपिशशापह ५३ कारणेनविनाश
मंस्त्रीजितेनत्वयायतः अतोदिगंबरोभूत्वास्मशानेविचरिष्यसि ५४ रुंडमालाधरोनित्यंपिशाचैःपरिवारितः ए
तस्मिन्नंतरेविष्णुःशिवरूपधरःशिवं ५५ दक्षाकोपपरीतांगंसांत्वयामाससादरम् विष्णुरुवाच किमसाम
यिकंशंभोप्रलयंकर्तुमुद्यतः ५६ त्वयिकोपसमाविष्टेइदंभवतिभस्मसात् नायंतेकोपसमयः क्षमस्वकरुणानिधे ५-

इतिप्रसादितःशंभुःकरुणाब्धिर्महेश्वरः उवाचपरमात्मानंकस्मात्त्वमिहचागतः ५८ श्रीभगवानुवाच त्रिशूल-
मुपसंहृत्यनारदजीवयप्रभो मासोभवतुपुण्योयंवरःफल्गोश्चदीयतां ५९ शिवउवाच यदिच्छसिजगन्नाथनार
दचिरायुषं तवैवनामघोषस्यविरामोमास्तुसर्वदा ६० यतीनामामृतेनैवचम्मरोप्यमरोभवेत् यदितस्यविरामःस्या-
न्त्रिशूलस्तंहनिष्यति ६१ नैकवासःसदाकार्योनैवान्यत्कर्मकारयेत् देशेवापिपुरेवापियत्रनिष्ठतिमानवः ६२उपो
गरहितस्तत्रअनर्थोजायतेसदा अतःसर्वप्रयत्नेनसवर्ज्यःस्करमिच्छता ६३ ज्ञातान्युज्ञापिसाफल्गुरंतस्तोयामबि
ष्यति प्रोह्याटयित्वास्नानार्थंपुनःपूर्ववदाचरेत् ६४ नोचेत्कीटाकुलंसर्वंजलंभवतिनान्यथा न्युब्जापित्वसदा
मर्त्यैपूर्ववत्फलदाभव ६५ नपस्येयन्मयाप्रोक्तंत्वयिनत्रैवदोषभाक् येनकुर्वंतिमनुजास्तेसदादुःखभागिनः ६६
इतिनेकायितंसर्वंफल्गोःशापस्यकारणं ६७ इतिभविष्यपुराणेफाल्गुनमासमाहात्म्येअष्टमोऽध्यायः ८ ७
सूतउवाच नदाप्रभृतिभोविप्राःशिवोजातोदिगंबरः न्युब्जाभवत्तदाफल्गुःफाल्गुनोभूच्चदारुणः १ गतेबहुतिथे-
कालेलुप्तसर्वंमहत्फलम् फल्गोर्वाफाल्गुनस्यापिसर्वाघौघविनाशनं २ जनाःपातकिनोजाताःशोकदुःखसमन्विताः
पुनस्तान्नारदोदृष्ट्वामनसैवंव्यचारयत् ३ पुरैकदारुतंकर्मफलंतस्यभुनज्म्यहं चिंतयित्वैवंययौतूर्णंकैलासशिव-
मंदिरं ४ ध्यानस्थितंशिवंदृष्ट्वापार्वतींप्रययौमुदा पार्वत्यापूजितोब्रह्मनंदनःखिन्नमानसः ५ नोचेकिंचित्तदाशै
लतनयोवाचनारदम् कस्मात्खिन्नोसिभगवान्काचिंताकुत्रवाभयं ६ गिरिजागिरमाकर्ण्यउवाचकरुणंवचः शृणु
त्वंगिरिजेनूनंममदुःखस्यकारणम् ७ नास्तितेसदृशानारीनदृष्टानश्रुतामया वंचितासिशिवेनत्वंमनोदुःखतरोस्य
हम् ८ पार्वत्युवाच कथंतेनवंचिताहंशिवेनप्रीतिमिच्छती नारदउवाच सर्वविद्यानिधिःशंभुर्मंत्रतंत्रविशा- १३
रदः ९ व्रतदानान्यनेकानिसर्वंजानातितत्वतः तेषांप्रभावान्नकदाविनाशस्तत्पिनाकिनः १० नवैवभवितानाशो-

यनः खिद्यामिसांप्रतं अत्रैवदृश्यतेमातर्निश्चयाद्गच्छिसांप्रतं ११ इत्युक्तानारदोदेवींयथौस्वभुवनंपुनः गतेतस्मिन्मुनौदे
वीहिमवंतंनगेश्वरम् १२ शिवंशुश्रूषयौतूर्णंनयत्नसुस्कदारुणं वानाशीशनवर्षाणिहिशतानिचनोयभुक् १३ शीतोष्ण
वानवर्षाणांसहनानिरहंकृती एवंकृतवतीनीव्रंतपःपरमदारुणम् १४ दशवर्षसहस्राणिस्थितावैकासनेसती ततः
प्रसन्नोभगवान्पार्वत्यतिकमायया १५ दृष्ट्वातथाविधांतांतुवल्मीकच्छन्नविग्रहाम् यथाघनघनच्छन्नंमार्तंडमिवभा
स्करम् १६ करैर्निष्पृसयामासशंभुःप्रीतिपुरःसरं अक्षाल्यसर्वगात्राणिआलिंग्यचपुनःपुनः १७ उवाचप्रीतिवात्स
ल्यात्कस्मात्तपसिसांप्रतं किंनेन्यूनंत्रिलोकेषुईप्सितंतेस्तिकिंपुनः १८ किमर्थंदुष्करंतप्तंतपःकेवल्यदंत्वया अनोव
रयतेभद्रवरंचित्तेभविष्यति १९ प्रीतोदास्यामिसकलमदेयमपिकस्यचित् इतिशंभुमुखोद्गीर्णंश्रुत्वावाक्यंतदासती
२० याचयामासदेवेशंनारदोक्तयथातथा ततःसचिंतयामासकेनेयंवंचितासती २१ ओमित्युक्त्वभगवांस्तस्यास्तपसि
मोहितः नयासाकंजगामाथनिर्जनस्थानमीक्षयन् २२ नारदोपिचसंचिंत्यप्रोवाचइतितुंबरुं तुंबरोममवाक्येनपक्षि
रूपधरोभव २३ गच्छत्वंशिवपार्श्वेतुतद्वाक्यंशृणुसादरं परगूढनयाकार्यनोचेद्भस्मीभविष्यसि २४ गृहीत्वात्तांययौ
तूर्णंशुकरूपधरःक्षणात् अन्विष्यमाणःसाशिवांपार्वतींपापनाशिनीम् २५ भ्रमतादृश्यतेनारीवःशिवगतिप्रदः वि
मृग्यमाणःसशिवोददर्शाहिमवद्गृहाम् २६ विविक्तंगाढतमसाद्वाग्वादिवार्जितां प्रविश्यतेनवयसानादृष्ट्वाव्यव
कोपिसः २७ अंकेगृहीत्वागिरिजांकथयामाससादरं सर्वमंत्राश्चयंत्राणिस्तोत्राणिविविधानिच २८ पुराणानिच
सर्वाणियानिगौणानिसर्वदा तानिसर्वाणिकथयन्प्रियायैभगवान्शिवः २९ शुकोपिश्रुतवान्सर्वंहर्षोत्फुल्ल
लोचनः विसस्मारनिजंवृत्तमुच्चैर्गर्जितमाकरोत् ३० शिवोपिचकितोभूत्वाक्रोसित्वमितिचाब्रवीत् शुकोपिभय
भीतःसन्गच्छरादंतुमुद्यतः ३१ शिवोपिप्रययौतावत्शुकंहंतुबलाद्विभुः पलायनपरोजातोयत्रयत्नपलायितः३२

तत्रतत्रशिवोगच्छन्वधायकृतनिश्चयः गच्छन्स्वर्गंचपातालंनप्रापशरणंक्वचित् ३३ तदाभूलोकमागत्यससस्मारह्रि
नारदं नारदोपिययौतस्मिन्यावन्नहतवान्शिवः ३४ शुकंप्रोवाचतरसानारदोजीवितार्थया नारदउवाच त्यजत्वं-
वाइवंदेहंयोषितायाःकलेवरं ३५ विशसूक्ष्मेणरूपेणनोचेच्छंभुर्वधिष्यति इतितद्वचनंश्रुत्वाद्विजाश्रममथाविशत्
३६ आश्रमादाश्रमंगत्वाव्यासाश्रममथाविशत् व्यासपत्नींततोदृष्ट्वाशुकंरहसितन्मुखे ३७ विवेशसूक्ष्मरूपेणनज्ञात
येनकेनवा दृष्टंशिवेनतत्सर्वंतत्रचस्थितवान्शिवः ३८ स्त्रीवधोबहुधानिंद्यतस्मात्तांनैवचाहनत् मार्गमनीक्षतस्त-
स्यद्वादशाब्दमतिक्रमत् ३९ उदरस्थोजपन्सूक्तंरुद्रंवाथत्र्यंबकं ततस्तुष्टोहिभगवान्सर्वज्ञोलोकवंदितः ४० माभै
षीर्निवदन्वत्सनिर्गच्छजठरानिलात् भविताशुकयोगींद्रःप्रसिद्धोजगतीतले ४१ इतितद्विरमाकर्ण्यनिर्गतःशुकरू
पधृक् प्रणम्यशिरसादेवंकृतांजलिरभाषत ४२ शुकउवाच देवलोकोपकारार्थंचिंतोसिमयाधुना तत्क्षम-
स्वापराधमेयद्वित्वंकरुणानिधिः ४३ उक्त्वैवांतर्दधेदेवःशिवःशर्वोमहेश्वरः शुकोव्यासात्मजोजातोद्वादशाब्दाद्वि-
निर्गतः ४४ नारदेनसमागम्यगोप्यसर्वप्रकाशितं नदादिफाल्गुनस्यास्यमहिमापूर्वविश्रुतः इतितेकथितंसर्वंपुनरुत्प-
त्तिकारणम् ४५ इतिश्रीभविष्यपु० फा० माहात्म्येनवमोऽध्यायः ९ ७ श्रीशुकउवाच शूलीचापियथौत
त्रयत्रसापार्वतीस्थिता तयासहययौतूर्णंकैलासंस्थानमात्मनः १ एकदानारदोब्रह्मन्वक्रधायांपरिभ्रमन् भ्रम
तादद्दशेतेनपृथुःशोकातुरोभृशं २ त्यक्तराज्यंकलिभयात्तंपृथुंमुनिरब्रवीत् नारदउवाच किमर्थंम्लानवदनः पृ-
थोपरमधार्मिक ३ पृथुरुवाच ब्रह्मपुत्रनमेदुःखशब्दोवाक्यप्रसादतः परंकलिजितश्चाहमनःकिंकरवाण्यहो
४ राज्यंसर्वंपरित्यक्तंतपसेकृतनिश्चयः नारदउवाच ज्ञात्वैवाहंसमायातस्तवभक्त्यास्कृतोषितः ५ उपायंकथयि
ष्यामिकिंतपैर्बहुवत्सरैः कुरुष्वफाल्गुनस्नानंसर्वसंकटहारकं ६ सर्वपापप्रशमनंविष्णुनागोपितंपुरा पृथुरुवाच

कथंफाल्गुनमासस्यव्रतंस्नानजपादिकं ७ कर्तव्यंसेनिहासंतन्रुपयावदसांप्रतम् नारदउवाच शर्वर्योत्यपदार्थेनुसमु
त्थायचिचक्षणः ८ रुत्वाद्वादशगंडूषान्गुरुदेवकृषीन्स्मरेत् उत्थायोषसिराजेंद्रशौचादिविधिवच्चरेत् ९ दंतानांधावनं
पश्चात्स्नानमर्घोदितेरवौ राधागोपालकंपश्चात्पूज्यचयथाविधि १० एवंदिनेदिनेविद्वान्यःकरोतिशुभामये ननस्य
पुण्यमहिमावक्तुंत्रिजगतिहिज ११ अस्मिन्मासेविशेषेणदानंनीरस्यदुर्लभम् जलदानंतुयोदद्याच्चस्यपुण्यफलंशृ
णु १२ कोटिकन्याप्रदानस्यचाश्वमेधशतस्यच वाजपेयसहस्रस्यदानानांकोटिशः क्रमात् १३ तत्फलंसमवाप्नो
तिनात्रकार्याविचारणा मासेस्मिन्सकृतश्रेष्ठनिर्जलेपथियेप्रपां १४ कुर्वंतितेषामयुतंवासोवैकुंठमंदिरे अस्मि
न्नेवहिमासेतुवाडवानांतुपूजनम् १५ सगंधचंदनैर्माल्यैर्व्यजनैर्धूपदीपकैः नानाभक्ष्यैःशीतनीरैःकुर्वंतिमनुजा
त्तमाः १६ तेषांवैकुंठसदनेवासःकियद्भवेदिति नवेद्मिपुरुषव्याघ्रतथापुण्यचयंशुभम् १७ तस्मात्सर्वप्रयत्नेनक
र्तव्यंफाल्गुनव्रतम् देवेषुयत्नेषुतपःसुचैवदानेषुयोगेषुचतीर्थराजे यःपुण्ययोगोभवनिसृणेनतत्फाल्गुनेचैवलक्षणा
र्द्धयोगात् १८ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येनारदपृथुसंवादेदशमोऽध्यायः १० ॐ नारदस्य
वचःश्रुत्वाहर्षनिर्भरमानसः प्रणम्यशिरसाभूमौकृतांजलिरभाषत १ पृथुरुवाच देवफाल्गुनमाहात्म्यंकृत्स्ना-
द्दुसंचविष्णुना तत्सर्वंश्रोतुमिच्छामित्वतोब्रह्मविदांवर २ नारदउवाच साधुपृष्टंमहाभागसर्वभूतहितैषिणा
तत्सर्वंकथयिष्यामिसावधानमनाःशृणु ३ पुरामयामहाभागगाथाश्चादशसंज्ञिकाः शोधितादीर्घदृष्टयाताःसारभू
तंमयाहृतम् ४ फाल्गुनस्यतुमाहात्म्यंसर्वपापप्रणाशनम् सर्वरोगहरंपुण्यंगोपितंचप्रयत्नतः ५ जानेबहुतिथे-
कालेकदाचित्समयेनृप स्वयंभूःस्रवमासीनःसत्यलोकेमहर्षिभिः ६ स्तूयमानःसगंधर्वैरप्सरोभिःसमंततः एतावं-
त्समयेराजन्जृंभमाणःपितामहः ७ जृंभणात्सरमोजातोदानवोभयवर्धनः दृष्ट्वातंविस्मितोब्रह्माबभाषेचचनंनृप

८ कोसौत्वंकुतश्चायातोनामकिंनेचदस्यमे दानवउवाच अहंतवमुखाज्जातस्तवपुत्रःप्रजापते ९ कर्तात्वंसर्व-
भूतानांमांनजानासिकिंततः दयालोदेहिमेनामरूपांकुरुममोपरि १० दानवोक्तंवचःश्रुत्याविस्मयाकुलचेतसः विह
स्यकिंचिद्वचनंप्रत्युवाचपितामहः ११ यतस्त्वंलंबकर्णोसितद्भविष्यतिनामते यतोसिममपुत्रस्त्वंददामिवरांश्चते
१२ दानवउवाच नमोनमस्तेस्तुपितामहायसर्वादिदेवायनमोनमस्ते उत्पत्तिकर्तारसिजगत्त्रयस्यब्रह्मस्वरूपेण
यतःस्थितोऽसि १३ विष्णुस्वरूपेणतथात्रयाणांगोप्तासिनूनंत्वंविश्वमूर्ते १४ एवंस्तुत्वानदादैत्योयथाभिलषितंवरं
वव्रेत्रिजगतोरिष्टनाशकंसर्वदेहिनां क्रोधावेशेनयद्दुष्कृद्दृश्यतेसहसामया १५ नूनंभवतुतद्दुस्त्यर्थंदितुष्टोसिमेप्रभो
१६ तथेत्युक्त्वात्मभूराजन्नजगामातर्हितोविभुः ततोविचार्यदैत्येंद्रःकिंमयाक्रियतेधुना १७ इतश्चेतश्चविचरन्वायु
वक्त्रेततोनघ वसुंधरायामगमत्भ्रमतादृशेपुमान् १८ उत्तमांगमयोरिव्यपुरुषोनिःकलेवरः विस्मयाविष्टमनसाउ
वाचपुरुषंप्रति १९ कोसौत्वंकुतश्चायातः कस्मात्त्वंनिःकलेवरं किन्नामकुत्रवासस्तेब्रूहिसत्यंममाग्रतः २० राहु
रुवाच अहंदैत्यकुलोत्पन्नोराहुनामामहासुरः अमृताशनवेलायांचंद्रेणकथितंपुरा २१ ततश्चक्रेणहरिणाया
वन्ममल्लंशिरः तावन्मयामृतपीतंतस्मादेकंस्थितंशिरः २२ इतितस्यवचःश्रुत्वाकोपात्स्फुरिताधरः चचर्वदशनैर्जि
ह्वास्त्रवद्बोधरेक्षणः २३ इतिक्रोधसमाविष्टउवाचवचनंरुषा लंबकर्णउवाच भोभोराहोममेष्टोसिसरवासि
ममबांधवः २४ कदात्वयामृतपीतंकिमर्थंहरिणाहृतम् चंद्रेणकथितंकस्मात्सत्यंब्रूहिममाग्रतः २५ राहुरुवा
च पुरादेवासुरगणैर्मथितः क्षीरवारिधिः तस्माज्जातानिरत्नानिचतुर्दशमितानिच २६ गृहीतादेवगणाः प्रत्येक
मगृह्णंस्तदा सुधारसेतुहरिनेत्यसुरैःकलहःकृतः २७ तत्रप्रोवाचभगवान्सर्वेषाममृतंमया दीयतेक्षणमात्रेणआ
लापान्मारुधाद्यथा २८ इत्युक्तामोहिनीरूपंजगृहेभगवान्हरिः देवताश्रेणिरपराचासुराणांतथापरा २९ सुरापा

चक्रेधृत्वाद्वितीयेत्यमृतंतथा देवश्रेणिषुपीयूषंसुरांचासुरश्रेणिषु ३० निरीक्ष्याहृच्छलंज्ञात्वादेवतारूपमास्थितः
देवश्रेणिषुसंप्राप्तोनिक्षिप्तावदनेसुधा ३१ तावच्चंद्रेणसूर्येणकथितंचक्रपाणिनः चक्रेणसरुषातेनजघानममस्तकम्
३२ तदाप्रभृतिदैत्येंद्रसूर्यचंद्रमसौकिल पीडयाभिशिरोमात्रोदृश्यतेयापिमानवैः ३३ इतिश्रीभविष्यपुराणेफाल्गुन
माहात्म्येलंबकर्णजननंएकादशोऽध्यायः ११ ७ राहोश्चवचनंश्रुत्वाकोपाद्रुणलोचनः हन्निष्येदुष्टचरितान्देवान्
परमघातकान् १ निरंजीवस्करंराहोकोत्यादौविनिपात्यते राहुरुवाच योसौपितामहोदेवःसर्वसंततिवर्धनः २स
घातितोजगत्सर्वघातितंनिश्चयेनहि तस्यतद्वचनंश्रुत्वासत्यलोकंजगामह ३ नारदंपुरतोदृष्ट्वावीणावादनतत्परं कृष्ण-
कृष्णेतिभाषंतंजपावत्कलधारिणम् ४ तंदृष्ट्वास्वयमापन्नउवाचपुरुषर्षभम् कोसित्वंपुरुषव्याघ्रकुतस्थः कुतआगतः
५ तस्यतद्वचनंश्रुत्वाब्रवीत्तंनारदोमुनिः ऋषिवेषोनारदोहंपर्यटामिइतस्ततः ६ सत्यलोकादागतोहंस्वयंभुतनुजः
स्मृतः आत्मरक्षांनिवेद्यायतस्मैवृत्तमपृच्छत ७ कस्त्वभोःकुतआयातोनामकिंतेवदत्वमे दैत्यउवाच लंबकर्णो
दैत्यवर्योज्ञातोहंब्रह्मन्भृशात् ८ पितामहाद्वरंप्राप्तोजातोहक्षितिमंडले ततोराहुर्मयादृष्टोवंचितोदेवतागणैः ९
तस्माद्देवान्सगंधर्वान्ऋषीन्यक्षान्सकिन्नरान् घातयामिक्षणार्धेनब्रह्मविष्णुशिवंतथा १० अधुनाभस्मसात्कुर्यांत्वा
तथैवपितामहं तद्भिरनारदःश्रुत्वाभयव्याकुलमानसः ११ प्रकर्षेकंपयामासवातेनचयथातरुः शिथिलावसनग्रंथिःशि
खाग्रंथिस्खलन्निगा १२ त्रुटितोचैणवस्तंतुर्धर्मेणयस्तवन्निव नोवाचवचनंकिंचिज्जगामातिह्रतोमुनिः १३ ब्रह्मलोकम
गात्पूर्णप्रोच्चेगद्गद्यागिरा ओब्रह्मन्त्वंमहादुष्टो स्यस्माकंघातकः किल १४ तंतथाविधमालोक्यब्रह्मातस्यपुरोगतः व
स्त्येतादृशंकेनतवारिष्टंविनिर्मितं १५ कस्मात्त्वस्लानवदनःकंपमानोसिकिंकृत तत्सर्वंममाचक्ष्वहरिष्यामिनवाहि
तं १६ नारदउवाच हातातनचकिंज्ञातंदुष्टायदत्तवान्वरं महाघोरतरंसर्वप्राणमोचनकारणम् १७ तेनसार्द्धनशक्ता-

स्तेयोऽहंहरिहरादयः किंपुनस्त्वंचशक्रश्चतथान्येदेवतागणाः १८ त्वदाज्ञयानिर्गतोऽहंपथितेनावलोकितः मामपृच्छ
स्तदैत्येंद्रः कोसित्वंपुरुषर्षभ १९ मयानुचात्मनः सर्वः संबंधः कथितः पुरा दैत्यस्तनूजंतेज्ञात्वादुतंमांहंतुमुद्यतः २०
तदाहंदैवयोगेनस्कंदेननचापिच त्वत्समीपागतः शीघ्रंशृणुष्वैतादृशींकथाम् २१ त्यजत्वंब्रह्मलोकंचपरिवारेण-
संयुतः अन्यथासौक्षणार्धेनदहेत्त्वांसपरिग्रहं २२ इत्युक्तानारदोयोगीजगामार्वाहतोनृप गतेनास्मिन्मुनौघातानि
नयाविष्टमानसः २३ विमृश्यैवंतदाधानादेवेंद्रमनिगम्यतां परिग्रहसमासाद्यआरूढोहंसपृष्ठके २४ जगामस
द्योयत्रास्तेमघवादेवतागणैः दैत्येंद्रोनारदंपश्यन्इतश्चेतःसमंततः २५ नदृष्ट्वान्नारदायकोपेनप्रज्वलन्निव तं
दामेनेंद्रानवेंद्रोदेवाःकिंचिन्मरुत्पिणः २६ चचालदानवस्तस्मात्यत्रास्तेग्रपितामहः यत्रयत्रकृतंतेनदृष्ट्वाचालोक
नंनृप २७ तत्रतत्रचदावाग्निः प्रदग्धुःसर्वभयंकरः पशुपक्षिस्थापदानांदाहकःपरमःस्मृतः २८ एवंहाहाकृतंतेनदा
नवेनकृतंजगत् सत्यलोकमगात्तूर्णंतत्रनास्तिपितामहः २९ ददाहसत्यलोकंसपशुपक्षिगणाकुलं नानाद्रुमलता
कीर्णपुष्पवाटीसमन्वितम् ३० उद्यानश्रेणिरचितंगोपुरैश्चविराजितम् अनेकरथ्यारचितंगोपुरैश्चसुशोभितं ३१
यत्रप्रसादवल्यश्चस्पृशंतिविधुमंडलम् अज्ञावदंतिइत्येवंकलंकंचंद्रमंडले ३२ इदंतेनश्रुतंतातताकिंकंनैवनिश्चितं
यदाहर्म्याणिदग्धानिज्वालाव्याप्तदिगंतरं ३३ तदाज्वालाव्रणंकिणोविस्फुरन्विधुमंडले लोकेस्मिन्पश्यनृपतेक्षतं
वैश्वानिसंभवम् ३४ यावत्तिष्ठतिशारीरंतावत्तस्यकिणोभवेत् अन्यथाशंकपंकादिकथमद्यापितिष्ठति ३५ इति
श्रीभविष्यपु॰ फाल्गुनमा॰ लंबकर्ण श्री॰ द्वादशोऽध्यायः १२ ६ पृथुरुवाच किमकारितंतस्तेनभयपुक्ते-
नब्रह्मणा दैत्यस्तक्रुद्धमानःसन्किंकरोन्मयिकथ्यतां १ नारदउवाच दूराद्दृदर्शमघवाब्रह्माणंसपरिग्रहम्



दृहस्पतिंसमासाद्यतर्कयामासचानघ २ ब्रह्मलोकात्किमर्थोयंत्यागतःसपरिग्रहः भयभीतइवाभातिभयंकिंस्मुप-

स्थितं ३ किंवादुष्टेनदैत्येनब्रह्मलोकान्निराकृतः विचार्यैवंजगामाथसकाशंब्रह्मणःस्वयं ४ ब्रह्माणंतुसमासाद्यमधु
वादेवनागणैः आनयामासभवनंस्वात्मीयंनृपसत्तम ५ विधिवत्पूजयामासनिवेश्यमृदुविष्टरे प्रणम्यशिरसाभूमौ
कृतांजलिरभाषत ६ ब्रह्मलोकंभवान्ब्रह्मन्किमर्थंत्यक्तवानिति तत्सर्वंकथयस्वामिन्भयंकिंदानवोत्थितं ७ ब्रह्मो
वाच देवेंद्राहंस्करवासीनोऽात्मलोकेपरिग्रहः तदामेऽभणंजातंऽभणाग्निर्गतःशिशुः ८ तंदृष्ट्वाकृपयाविष्टोमो-
हात्तंदत्तवान्वरं यन्निरीक्षसिकोपेननस्यभस्मभवेदिति ९ एवंलब्ध्वावरंमत्तोदानवोदुष्टमानसः राहूपदेशात्संक्रुध्यो
नारदंहंतुमुद्यतः १० कृच्छ्रात्तस्माद्भिर्गतस्तमांचप्रत्यागतोमुनिः तत्सर्वंकथयामासयत्कृतंतेनभूपते ११ तस्माच्छु-
क्रात्महननंभवतांचस्करेश्वर देवताहननेनस्यबुद्धिर्महतिवर्तते १२ अतोविचारःकर्तव्यःसर्वेषांप्राणरक्षणे वदत्येवं
विधोराजन्ब्रह्मलोकात्कपिंजलः १३ ब्रह्मलोकादागतस्तेनसर्वंनिवेदितम् तस्यतद्वचनंश्रुत्वाभयव्याकुलमानसाः
१४ लंबकर्णंदृष्ट्वदुरात्मदेवगणास्तदा ऊचुरेंद्रःस्तदावाक्यंक्षीराब्धिंप्रतिगम्यतां १५ विचार्यैवंतदाशक्रोदेवदैर्ज-
गामह माघफाल्गुनयोर्मध्येऽमायांदेवतागणाः १६ जलमध्येनिमग्नास्तेयावत्फाल्गुनमासकः अतोफाल्गुनमास
स्यस्नानकोटिगुणाधिकं १७ अस्मिन्मासेप्रकुर्वंतिजलदानंचयेनराः तेषांपुण्यस्यमाहात्म्यंवक्तुशेषोपिनप्रभुः १८
लंबकर्णोमृगयत्यांयदादेवान्नपश्यति तदादैत्यान्समासाद्यअधिकारंकरोतिच १९ सूर्येंद्राग्न्यनिलेंदूनांयमस्यवरुण
स्यच अन्येषांचैवदेवानांऽधिकारंचकारह २० भूमावप्यागमत्सद्यःपीडयामासमानवान् राजानोनिहतास्तेनमहाब
लविमोहिताः २१ अग्निहोत्राणिछिन्नानिदेवतायतनानिच भ्रष्टाचाराःकृतास्तेनब्राह्मणायागवर्जिताः २२ तेनदारा-
धाडवास्तेहतशेषाश्चमानवाः ऋषयःसिद्धगंधर्वाजग्मुःक्षीराब्धिसन्निधौ २३ फल्गुसंगमोयत्रास्तेतत्रतेसंस्थितानृप तत्र
स्नानेनदानेनमासिफाल्गुनकेद्विजाः २४ यत्फलंलभ्यतेनृभिर्वक्तुंकेपिनशक्नुवन् एवंहाहाकृतंसर्वंजगदेतच्चराचरम् २५

दानवेनानिबलिनास्वामित्वंत्रिजगत्कच कृतंचदानवैःसार्द्धंबलिभिर्दुष्टविग्रहैः २६ शुक्राचार्यसमासाद्यराज्यंचकृतवान्बली कृत्वास्तेदेवनाशंदंडनिशोधंचकारह २७ अमात्यास्तस्यचत्वारोनामानिकथयामिते नीलकंठोवक्रदंतोलंबनासोरुविक्रमौ २८ विकटोविकटास्यश्चस्थूलदंतोरुहत्कटिः नागाननोयुगभुजोमेघवर्णःस्करांतकः २९ अष्टौनस्याभवन्पुत्राःशक्रतुल्यपराक्रमाः तेषांचत्वारश्चत्वारःपुत्राव्यासन्नरोत्तम ३० एवंसपुत्रपौत्रस्तुराजदनुजाधमः अक्षौहिणीनांसाहस्रैर्दानवैःपरिवारितः ३१ इतिश्रीभविष्यपु० फाल्गुनमा० त्रयोदशोध्यायः १३ ऋ पृथुरुवाच किंचचक्रुर्देवगणागंधर्वाऋषयस्तदा जलमध्येविषण्णास्तेतत्सर्वंकथयप्रभो १ नारदउवाच जलेस्थितादेवगणाश्चिंतयापरयाहृताः मिथोविचार्यमाणास्तेशोकदावाग्निपीडिताः २ एतस्मिन्समयेराजन्वाण्याकाशास्थिताभवत् मासानांफाल्गुनोमासोफल्गुतीरेतुदुर्लभः ३ सोयंयूयंदैवयोगात्संप्राप्ताफल्गुरुत्तमः तस्मिन्स्नानेनदानेनप्रभुरावीरभूत्किल ४ हरिष्यतिचवोदुःखंरूपयापरयाविभुः एवंस्वर्गिरमाकर्ण्यविस्मिताश्चानवारयः ५ मिथोचुर्निर्झराःसर्वेकेनोक्तंवचनंत्विदम् केप्यूचुः भवतांरूपयादेवःस्वर्वाण्याकथयत्प्रभुः ६ केप्यूचुः कृपालुनाभगवताकथितंयदिनोव्रतं विधिःकेस्मान्नकथितस्नानदानस्यचानघाः ७ एवंसंचिंत्यमानास्तेदानवेनानिधर्षिताः एतस्मिन्समयेराजन्योगींद्रोबादरायणः ८ ययौयत्रसगंधर्वादेवान्त्रासन्भृशातुराः तंदृष्वामुनिशार्दूलममरावस्मिताभवन् ९ तेरुत्थायासनेस्थाप्यविधिवद्देवतागणैः अर्हणांचक्रुतसर्वैःस्ववृत्तांतंनिवेद्यच १० स्वर्वाण्याकथितंयच्चतत्सर्वंमुनिनिवेद्यच आत्मनीदंफाल्गुनस्यव्रतेपप्रच्छतुर्मुदा ११ व्यासउवाच साधुपृष्टंमहाभागादानवेनानिधर्षिताः सर्वसंकटदावाग्निदृष्टिभूतंवदामिवः १२ प्रातरुत्थायविधिवत्शौचादिविधिपूर्वकं दंतधावनकंकार्यंपश्चात्स्नानंसमाचरेत् १३ राधागोपालकंध्यात्वा पूजयित्वाप्रयत्नतः धात्रीफलैश्चतत्पत्रैः कोमलैस्तुलसीदलैः १४ नानापरिमलैःपुष्पैरनेकैर्ऋतुसंभवैः अस्मिन्मासेविशेषेण

दध्यन्नंप्रीतिवर्धनम् १५ ब्राह्मणेभ्योयथाशक्तिदानव्यंप्रीतिहेतवे धात्रीमूलेपूजननुभोजननत्रकारयेत् १६ कुंभद्वा
नंदिनेदद्याद्विजेभ्यश्चसदक्षिणं अस्मिन्नेवहिकर्तव्यानिर्जलेपवासिके प्रपा १७ दिनेदिनेप्रकर्तव्यंचंदनेर्द्विजपूजनम् चणको
द्भवलड्डुकान्त्रयस्त्रिंशतिकांस्तथा १८ विप्रायवायनंदद्यात्कोटिकोटिगुणाधिकं दानेनचंदनस्यास्यचंद्रकांतोभवेन्नरः १९
द्राक्षादीनंप्रयत्नेनकर्तव्यंमासिचानघे अशीरव्यजनस्यास्मिन्दानंस्कृतवर्धनम् २० वटकान्तंडुलभवान्दध्नाभोजनमु
वच दानव्यंगोपिनाथायविप्रेभ्यश्चयथारुचि २१ कार्त्तिंगणस्यदानेनगोपिनाथःप्रसीदति एवंफाल्गुनमासेतुकर्तव्य
प्रीतिहेतवे २२ एवंकृतेत्वयाशक्रएनैश्चदेवनागणैः साक्षात्प्रसन्नोभगवान्वांछितंपूरयिष्यति २३ इत्युक्तांनहितस्त
स्मात्हर्षिर्बादरायणः गतेतस्मिन्मुनौराजन्शक्रादिदेवनागणाः २४ चक्रुस्तुव्रतराजंतंयत्रास्तिफल्गुसंगमः स्नानदा
नंजपंहोमंगोपीनाथस्यपूजनं २५ कृत्वाशर्करयामूर्तिंराधागोपालकस्यच दिनेदिनेनुविधिवत्कृत्वापूजाविधिंनृ
प २६ रात्रौजागरणंनत्रगीतवाद्यैर्मंगलैः भोजनंद्विजवर्याणांदध्यन्नैर्लड्डुकैस्तथा २७ वटकैरन्यभक्ष्यैश्चभोज्यैर्द
त्वात्मनेकशः एतद्व्रतप्रभावेणशंखचक्रगदाधरः २८ गोपीनाथोत्थाविरभूद्देवानांपश्यतांनृप २९ इतिश्रीभ
विष्णुधर्मोत्तरे फाल्गुनचतुर्दशीव्रतोध्यायः १४ ऋ दृष्ट्वास्तेस्करादेवंशंखचक्रगदाधरंपीतांबरपरीधानंसर्वतोक्षिशिरोमुख
१ सर्वतःपाणिपादंतंसर्वव्यापिनमीश्वरम् नमस्कृत्वासगंधर्वाःपूजयामासुरच्युतं २ तदास्तोत्रंप्रचक्रुस्तेसर्वाभी
ष्टप्रदंनृणां देवाऊचुः दीननाथदयासिंधोयोगिहृत्पद्मसंस्थित ३ अनादिसिद्धव्यक्तभूतानामीश्वरप्रभो
त्वंगतिःसर्वलोकानांदीनानांदीनवत्सल ४ अनेकपापनिकरदावभूतजगत्पते अस्माकंसर्वशक्तिस्त्वंतुभ्यंसर्वात्मनेनमः
५ सर्वभूताशयस्त्वंहिसर्वभूतस्थितिः सर्वभूतातिरिक्तस्त्वंतुभ्यंसर्वात्मनेनमः ६ जगद्रासचिदाभासज्ञानगम्य
नमोनमः शंखासुरबलघ्नायवेदसंरक्षकायच ७ पालकायचलोकानांमत्स्यरूपायतेनमः समुद्रमथनेपूर्वंम

राद्विधरायच ८ दुष्टदानवहारायकमठायनमोनमः यज्ञवाराहरूपायनृसिंहायनमोनमः ९ बलिदर्पघ्नेतुभ्यंशक्रस्य-
प्रियकारिणे अस्माकंदुःखनाशायवामनायनमोनमः १० क्षत्रियस्यकुलोन्मत्तनाशकायनमोनमः कृपाकारायरामाय
नमस्तेपरशुधारिणे ११ अस्माकंबंधनाशायदशग्रीवांतकायच मुनिमानसहंसायरामचंद्रायतेनमः १२ शेषाय दानवघ्ना-
मोहुलधरायच कंसांतकायदेवायरामरुक्ष्मापतेनमः १३ तपोरूपायमौनायनमःकारुण्यमूर्तये पालकायचलो
कानांबौद्धरूपायतेनमः १४ म्लेच्छांतकायदुष्टानांदानवानांचमृत्यवे भक्तिप्रियायदेवायकल्किरूपायतेनमः १५
यदायदाहिदुष्टानांदानवानांभयंभवेत् तदातदावतीर्णायतुभ्यंकारुण्यमूर्तये १६ एवस्तुत्वातदादेवाः पुष्पवृष्टिमु-
मोचिरे ननृतुश्चेसरान्देवस्तमोहंभवतांस्तवैः १७ पूजयाचैवभक्त्याचप्रातःस्नानेनफाल्गुने संकष्टहरमेनच्चस्तोत्रं-
ख्यातिमुपैष्यति १८ यइदंपठतेनित्यंसंकष्टंतस्यनश्यति एकवारंद्विवारंवात्रिवारंवापियःपठेत् १९ वांछितंलभतेनि
त्यंयशआयुःप्रवर्धनं सप्तवारंपठेन्नित्यंमासिफाल्गुनकेसराः २० ब्राह्मणोलभतेविद्यांक्षत्रियस्तुवसुंधरां धनंचलभ
तेवैश्यःशूद्रश्चसुखमश्नुते २१ नाभिमात्रेजलेस्थित्वामासिफाल्गुनकेशुभे सप्तवारंपठेद्यस्तुभार्यांप्राप्नोत्यसंशयं २२
मातृहापितृहाचैवब्रह्महागुरुतल्पगः सुरापोदासिगामीचन्यनैकैःपातकैर्वृताः २३ सप्तवारंदिनेभानोः भानोश्चाभिमु
खःपठन् निःपापाश्चभवंतीहनात्रकार्याविचारणा २४ दशावर्तंपठेन्नित्यंभूमिशायीजितेंद्रियः देवतायतनेविद्वान्शुक्ल
प्रभौ २५ त्रिःसप्ताहंपठेद्यस्तुतस्यपुत्रोभविष्यति त्रयस्त्रिंशतिवारंतुयःपठेद्वजनीमुखे मासेनचानघः
स्तस्यकुष्ठनाशोभविष्यति २६ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनं पुत्रार्थीलभतेपुत्रंनिष्कामोमोक्षमाप्नुयात्२७
इतिश्रीभ॰ फा॰ मा॰ पंचदशोऽध्यायः १५ ऋ नारदउवाच एवमुक्तासभगवान्पुनःप्राहनरोत्तम दैत्यनाशक १८
.कयत्कालंमतीक्ष्यतां १ महाबलेनदैत्येनधर्षिताःपरमापदं प्रापिताःस्वल्पकालेनस्वाधिकारानवाप्स्यथ २

भगवद्वचनंश्रुत्वाऊचुस्तेदेवनागणाः यदिप्रसन्नोभगवानस्माकंजगदीश्वरः३ अचिरेणैवकालेनदैत्यनाशंकरुप्रभो
सन्निधौनावदस्माकंवासंकुरुयथोशतः ४ तथेत्युक्तंभगवताशंखचक्रगदाभृता जगामाथात्मनःस्थानंदैत्यनाशःकथंभ
वेत्५ एवंसंचिंतयामासभगवान्कमलेक्षणः वरदत्तेनदैत्येनयोद्धुंसाकंनवैप्रभुः ६ अहमेवापिकोवापिस्वांमायामस्र
जन्हरिः विंध्यस्यचोत्तरेभागेमायारूपंतपोवनं ७ शतयोजनविस्तीर्णनानाद्रुमलताकुलं अनेकपुष्पसौगंध्यवासितो-
८ पूर्णांतृप्तिमवाप्नोतिमलयंनैवगच्छति नानापक्षिगणाकीर्णंफलस्तबकराजितं ९ लुब्धाश्वदनदृष्टेषु.
वृक्षाइवभुजंगमाः कदानैवोत्तरंतीहचटशारवाइवाबभुः १० सिंहशार्दूलनागाद्यागवयाद्रिणादयः सहोदराइवाभा
। । सकेवलम् ११ तस्यदक्षिणदिग्भागेउद्यानंदिव्यचक्षुषः कपिंजलस्यब्रह्मर्षेराश्रमस्तत्रवर्तते १२ तस्यभा-
विसुकमतीरूपयौवनशालिनी तस्यशिष्योमहानासीत्पिंगलाक्षेतिनामतः १३ कदाचिद्दैवयोगेनमायारूपेतपोवने
आगतःपिंगलाक्षोसौपत्रपुष्पसमित्कुशान् १४ छेदनार्थंतुतद्दृष्टंदिव्यरूपंतपोवनं निवेदयामासगुरुस्वामियंनृपस
त्तम १५ मुनिरप्यागतस्तस्मिन्सशिष्यःसपरिग्रहः चकारचाश्रमंतस्मिन्नकरोदुष्करंतपः १६ एवंचकारसमुनिर्मायाभू
वने लंबकर्णस्यविख्यातोधूम्रलोवाहिनीपतिः १७ चम्वापरिवृतोरण्येमृगयांचचकारह मायारूपस्तदैत्येनम-
यूरःस्वर्णरूपधृक् १८ एकाकीहयमारुत्यपार्षदैर्वर्जितःकिल मयूरपृष्ठतोराजन्मृहत्यात्वरयाययौ १९ मयूरोपव
नंप्राप्यपूर्णकुट्यांमुनिर्ययौ दैत्योपिहर्षमापन्नोमुनेराश्रममभ्यगात् २० अवतीर्यादवनिकुट्यांप्रविश्यदनुजाधिपः
मिलकुशं २१ दृष्ट्वावसुकमतींरम्यांरूपयौवनशालिनीं विदीर्णःकामबाणेनधर्षवु ६
चकारह २२ तावन्मायामयंचक्रंज्वालाव्याप्तदिगंतरं दिष्ट्यागोचरमत्युग्रंदृष्ट्वाभयप्रकंपितः २३ पदानिनिर्ययौतस्मा
अश्वस्यानयनेबुद्धिर्नैवजातानराधिप २४ त्वरयापरयाविष्टोभ्यगाद्यावत्स्वपत्तनं तावत्पृष्टेभ्य

गाच्चकंपश्चाद्गुप्तंभवल्किल २५ विस्मयक्षणमात्रंतु लंबकर्णः पुरंययौ कौतुकंकथयामासयज्जातंचतपोवने २६ देवएतादृशीभार्यानभूतानभविष्यति त्वंसर्वरत्नभोक्तासिदेवासुरनिबर्हणः २७ स्त्रीरत्नमनिचार्वंगीत्वयाकस्मा भगृह्यते धूमलस्यवचःश्रुत्वायोगमायाविमोहितः २८ चकारसिद्धनुरगंहर्षनिर्भरमानसः मुख्यामात्यैःसमागम्य ईषत्सेवकसंयुतः २९ जगामसद्योयत्रास्तेपर्णकुट्यांनरोत्तम स्त्रीत्येवकारणंवेदमृत्योस्तस्यनसंशयः ३० दशाननो पिराक्षोपिस्त्रीनिमित्तंलयंगताः तस्मात्सर्वप्रयत्नेनपरस्त्रीणापरिग्रहः ३१ इतिश्रीभ०पु०फा०मा०षोडशोऽध्या यः १६ ५ नारदउवाच तस्यदुष्टाभवन्मार्गेशकुनाश्चनरोत्तम तथापिनपराजग्मुर्विष्णुमायाविमोहितः १ इत्थमल्पेनकालेनउद्यानेविष्णुनिर्मिते बभ्रामदनुजैःसार्द्धंदृष्टवानाश्रमंऋषेः २ पूर्ववत्तत्रपुष्पार्थंसशिष्योमुनिषुंग वः निर्जगामनरव्याघ्रशंकितोदुष्टचेष्टितान् ३ चेतोदैत्यश्चदुर्बुध्यापर्णकुट्यांविवेशह तादृक्षारूपसंपन्नांकृशांगी यौवनोन्मत्तां ४ प्रहस्यदानवःकिंचित्स्मरबाणेननाडितः उवाचतांमदोन्मत्तोज्ञात्वाएकाकिनींनृप ५ देवित्वंनिर्जनेदेशेकिंपत्कालंनुवर्तसे तपसस्तवचेदानींफलरूपोहमागतः ६ त्रैलोक्याधिपतिश्चाहंदेवासुरनिबर्हणः मत्प रिग्रहतांप्राप्यत्याहिशीघ्रममाश्रयं ७ दैत्यस्यगिरमाकर्ण्यप्रोवाचमधुरंवचः इतोयाहिमहादुष्टभाषणंमाकृथाःवृ था ८ देव्याश्चवचनंश्रुत्वाउत्थायदानवाधमः तस्याःकरेकरंकृत्वास्कंधमारोप्यनिर्ययौ ९ तंदृक्षासऋषिर्दूरादंतिके मययौक्षणान् रेरेदानवदुष्टत्वंवृथाधर्षितुमुद्यतः १० त्यजभार्यांगुणवतींयदिजीवितुमिच्छसि नोचाचवचनंकिंचित्स रयानिर्ययौरवलः ११ शशापसमुनिःकोपाद्भस्मसाद्ववचारितः निर्गत्यत्वपुरात्पूर्णयत्रास्तेसमुनिर्नृप १२ मुनेःसमीप मासाद्यहनवीर्योबभूवह पृथुरुवाच मुनेएवंकृतवान्किमर्थंभगवान्हरिः १३ तत्सर्वंकृपयातातकथयस्वम- माशतः शृणुराजन्भवस्यामिस्वयापृष्टंयदद्भुतं १४ ऋसौमुनिःकापिलश्चराक्षस्यामभवल्किल रावणस्यपियोत्य

र्थंशक्रस्यहरणायच १५ परंतपश्चाचरतितस्यनाशस्यहेतवे इदंचकृतवान्विघ्नंसर्वलोकहितावहम् १६ दुष्टेनदुष्टह
ननमकरोद्दीनवत्सलः एवंसभगवान्विष्णुः कृष्णःकपटनायकः १७ ज्ञात्वाभयाकुलंनित्यंस्वात्मानंक्षीणशक्तिकं तपोव-
नाच्चसमुनेर्निर्ययौप्रथमाश्रमम् १८ गतेतस्मिन्मुनौराजन्तपोवनमगाद्भुतम् अष्टोत्तरशमहापुत्रास्तस्यामात्यश्चतुरस्र
था १९ रथनागाश्वपत्तिभिरनेकैःपरिवारिताः विप्रचेरुःसमंतात्तेतत्रनास्तिमुनिर्मठे २० चक्रुस्तस्योत्तरकार्यंशोकदावाग्नि
पीडिताः २१ दृष्ट्वाब्राह्मणरूपंतुजगृहेभगवान्हरिः तेषामंतिकमागत्यकृष्णःकपटनायकः २२ उवाचतेषामधुरवचन
जगदीश्वरः श्रीकृष्णउवाच इतोगच्छथहेदैत्यायदिजीवितुमिच्छथ २३ तस्यैववचनंश्रुत्वाकोपादुरुणलोचनः
यावज्जघानपरशुतावदाविरभूत्प्रभुः २४ तेषांयुद्धमभूद्राजन्मुनिविस्मयकारकम् चक्रेणबलिनातेननिहताश्चम
रारयः २५ ततोहाहाकृतंसर्वंदैत्यसैन्यंपराजितम् तदातेदानवाराजन्शेषाःपातालमाययुः २६ जज्वलुश्चाग्नयःशांताः
सद्यःभोभूद्दिवाकरः ववुःपुण्यास्तदावाताःदिशश्चविमलाभवन् २७ तत्राययुःसुरगणानृत्तुश्चाप्सरोगणाः जगुर्ग
धर्वपतयोवेदघोषश्चबाडवाः २८ इतिश्रीभ०पु०फा०मा०पृथुनारदसंवादेसप्तदशोऽध्यायः १७ ऋ नारदउवाच एव-
स्तुनस्तदादेवैर्जगामातर्हितोहरिः स्वस्वेधिकारेदेवास्तेययुर्विनिहतारयः १ तदाप्रभृतिराजेंद्रसर्वलोकहितावहम् प्रकट
फाल्गुनव्रतंजातंचक्षितिमंडले २ सर्वेतेमनुजात्यर्थंचक्रुश्चफाल्गुनव्रतम् तेषांसंसर्गयोगेनपशवोज्ञानमाभुवन् ३ फाल्गु
नस्नानदानेनरेजुस्तेपुण्यशालिनः दिनेदिनेयथाचंद्रःकलाभिरतिवर्धते ४ तथावैमनुजव्याघ्ररेजुस्तेपुण्यशालिनः यः
कश्चित्पुरुषःकुत्रवर्ततेपापकर्मकृत् ५ तेषांसंपर्कयोगेनपुण्यवान्भगवान्किल एवंक्षितितलेकेपिमनुजाःपापशालि
नः ६ नावसीर्दंतिराजेंद्रपुण्यशालिनिमासके मृतावैप्राणिमात्रायेभवंतिवैकुंठवासिनः ७ नकोपियमलोकस्यगामीक्षि-
तितलांतरे यमोपिखिन्नमनसश्चिंतयाविष्टमानसः ८ चित्रगुप्तसमासाद्यमंत्रंचक्रेहिताय च एतस्मिन्समयेतत्रगतोहंनृप

सत्तम ९ अहर्णावधिवच्चक्रेपृष्ठलेनाप्यहंकिल यमउवाच अनधिकारिणासाधोकिंकर्तव्यंमयाधुना १० नारदउवाच फाल्गुनेस्नानदानेनमनुजाःपुण्यशालिनः नयांतितवलोकेस्मिन्नतस्त्वव्रतमाचरत् ११ एतद्व्रतप्रभावेनविष्णुस्त्वांचप्रसीदति वरंयाचयतस्मात्त्वंकुरुयुत्तमिदंव्रतम् १२ एवमुक्कागतोहंचव्रतंसोपिचकारह तस्यव्रतप्र । वेनविष्णुरावीरभूत्किल १३ शमनःपूजयामासप्रणामंमुहुर्मुहुः यमउवाच भगवन्देवदेवेशलोकनाथजगत्प्रभो १४ तवाज्ञयाहंनिष्टामिअधिकारस्तथापिच अधुनानाशमायातिकिंकर्तव्यंमयाधुना १५ यदिप्रसन्नोभगवान्कुरुयुसंजगत्पते तथेत्युक्कातुभगवान्जगामांतर्हितोनृप १६ मायारूपांमोहिनींतुकृतवान्जगदीश्वरः अचनौघनविघ्नायप्रेषयामासनाशिकाम् १७ आगताजगतिपृष्ठेविघ्नानिचचकारह तयासंमोहितंविश्वंजगदेतच्चराचरम् १८ मायारूपायुवतयोनिर्मिताश्चसहस्रशः रूपलावण्यसंपन्नास्ताभिर्व्याप्तंचभूतलम् १९ मोहितामनुजास्ताभिःकामबाणेनपीडिताः रेमुर्दिवानिशंराजन्स्नानदानविवर्जिताः २० एवंक्षितितलेजातामानवादोषतत्पराः नचक्रुस्तेस्नानदानजपहोमादिकाःक्रियाः २१ एवतयाकृतंविघ्वंशमनस्यमहात्मनः जगदीशसकाशंसायथौप्रोवाचमोहिनी २२ मोहिन्युवाच कार्यकृतंजगत्स्वामिन्मयाकिंक्रियतामिति भगवानुवाच युगेकलौतुसंप्राप्तेफाल्गुनस्यतुयद्व्रतम् २३ नयेकुर्वंतितेषांचैमोहनंकुरुसर्वदा सूतउवाच शमनंरूपयाएवंफाल्गुनस्यशुभोत्तमं २४ चकारयुत्तभगवान्जगदात्माजगत्प्रभुः नारदउवाच यदाकलिःप्रवृत्तस्तुजनासुकृतवर्जिताः २५ यमस्यलोकंसर्वेतेगम्यमानाःसहस्रशः तेषांचरूपयाराजन्पुनश्चप्रकटंभवेत् २६ एवंफाल्गुनमासस्यशुकृतंपरमंमतम् सर्वेषांचैवमासानामुत्तमोयमुदाहृतः २७ मासानांमार्गशीर्षस्तुविभूतिश्चोच्यतेबुधैः अयंतुसाक्षाद्भगवान्नात्रकार्याविचारणा २८

इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येपृथुनारदसंवादेअष्टादशोऽध्यायः १८ ५ नारदउवाच अत्रैवो



२०

दाहरंतीममंतिहासंपुरातनम् पुराकृतयुगस्यांतेकांचीपुर्यांनरोत्तम १ जाबालिर्नामविप्रोभूत्त्वकर्मनिरतःसदा क
दाचिद्दैवयोगेनजातिभ्रष्टोबभूवह २ सर्वाणिदुष्टकर्माणित्याचरद्द्विजनायकः मद्यमांसानिसर्वाणिबुभुजेमुनिपुग
वः ३ दिनेदिनेतुवेश्यायाःगृहेनिष्ठन्निराकुलः एवंदक्षानागरीकैःस्वग्रामाच्चबहिष्कृतः ४ ततस्कवेश्ययासार्द्धंकोलापु
र्योजगामह चकारोदरपूर्त्यर्थंमांसादिविक्रयंततः ५ मार्गेमार्गेचरान्हत्वामृगपश्वादिकांस्तथा वेश्ययासहितस्तत्रभू
नायबहुवासरम् ६ कालेनबहुनाराजन्सपंचत्वमगाद्द्विजः यमदूतैस्ततोबद्धापाशैःपरमदारुणैः ७ ताडयामासुरबहु
लंतमकंटकसंभवैः मार्गेणनिन्युःपापिष्ठंपृष्ठवान्यमराड्यमः ८ चित्रगुप्तंसमासाद्यपुण्यलेशंपप्रच्छच पुण्यलेशो-
नवैज्ञात्वापीडांचक्रुरनेकधा ९ कुंभिपाकादिनिरयेलोहकंटकनापिते क्षिप्त्वापुनःपुनस्तस्मैताडयामासुपाशकैः १०
ततः पैशाचिकींयोनिंक्षिप्तवान्शमनोद्विजम् पैशाचींयोनिमापन्नोभक्षयामासमानवान् ११ द्विजबंधुंमृतंज्ञात्वाचे-
श्याशोकंचकारह शोकंत्यक्त्वानागरीकैःसमागम्यद्विजस्यच १२ चकारोत्तरकार्यंतुचिंतयामासचात्मनि किंकर्तव्यम-
याचाद्यकालक्षेपकथंभवेत् १३ तस्मिन्नेवपुरेविप्रोदेवदत्तोत्यसीत्किल कृत्वातस्यगृहेवासःसेवांकृतवतीतदा १४
कदाचिद्दैवयोगेनफाल्गुनोमासआगतः सविप्रःफल्गुस्नानार्थंजगामचतयासह १५ वेश्यापिचक्रेविधिवत्यथावद्गुरु
णोदितम् स्नानदानंजपोहोमंयद्यत्कर्मचकारह १६ तत्तज्जाबालिमुद्दिश्यवेश्यापिकृतवान्नृप तस्यव्रतस्यपुण्येनपि-
शाचोज्ञानमन्वगात् १७ वेश्याशोधंचकारासौक्षणेनक्षितिमंडले फल्गुतीरेतुतान्दृष्ट्वाऽब्रवीच्चकरुणंवचः १८ पिशा
चउवाच जाबालिरहंविप्रवरोभ्रष्टोहपूर्वकर्मणा चरित्वाहत्वयासार्धंमनेकैर्दुष्टकर्मभिः १९ तेनदोषेणशमनःएत-
स्यांक्षिप्तवान्ततो अनोमांकृपयाभद्रेरक्षिप्तसंतारयस्वभो २० तस्यतांगिरमाकर्ण्यसावेश्यादीनचत्सला फल्गुनीर
करेधृत्वाफाल्गुनस्नानजंफलम् २१ ददौतस्मैपिशाचायदिव्यरूपोभवत्तदा विमानंदिव्यमगमदप्सरोभिःसमन्वितं

२२ विष्णुरूपधरैःसाक्षाद्विष्णुदूतैरलंकृतम् दिव्यरूपधरावेश्यासाभवद्राजसत्तम २३ दूतैर्विमानेसंस्थाप्यवेश्ययासहितोद्विजम् पश्यतांसर्वलोकानांविष्णुलोकंजगामह २४ एतत्तेकथितंराजन्माहात्म्यंफाल्गुनस्यच सर्वपापप्रशमनंभूयः किंश्रोतुमिच्छसि २५ इतिश्रीभविष्यपु० फाल्गु० एकोनविंशोऽध्यायः १९ ध्रुव उवाच फाल्गुनस्यउपांगानिव्रतानिकथयाशुनः कृतेषुयेषुभवतिसंपूर्णंफाल्गुनव्रतम् १ नारदउवाच पूर्णिमायांफाल्गुनस्यहोलिकापूजनंस्मृतम् विष्टिविघ्नकर्तव्यंसंकटेविष्टिपुच्छके २ भद्रायांहेलनकर्तव्येश्रावणीचहुताशनी श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी ३ अत्रैवोदाहरंतीममितिहासंपुरातनम् पुरात्रेतायुगेकालेनृसिंहपुरपत्तने ४ तत्रनृसिंहोभूपतिरासीद्बहुधनेश्वरः अष्टौप्रधानास्तस्यासन्नामानिकथयामिते ५ क्रमंगलोभंगलश्चविरूपाक्षःप्रभंजनः नीलग्रीवोविघ्नमूर्तिःक्रमतिश्चक्रमेधसः ६ पुत्रासंस्तस्यचत्वारोगोपीनाथोनलस्तथा बृहद्बलोविघ्नमूर्तिःसर्वेशक्रपराक्रमाः ७ तस्यभार्यागुणवतीसतीसर्वगुणाश्रया एवंस्वराजास्वपुरेबुभुजेगांनिराकुलः ८ पूर्णिमाफाल्गुनेमासिश्रागतानृपसत्तम तस्यांव्रतंहुताशन्यांभद्रायुक्तंचकारह ९ अज्ञानाद्वैधयोगाच्चकृतंकर्मदुष्करं तेनदोषेणसकलंदग्धराज्यंबभूवह १० तदाचिंतातुरोराजामंत्रिभिःपरिवारितः किंजातंराष्ट्रदग्धेनकिमर्थंक्षोभितोनलः ११ यदानबुबुधेकोपितदासन्नृपसत्तमः राष्ट्रेसंस्थाप्यविधिवन्मंत्रिणांसहितंशुभम् १२ तपोवनंजगामाशुकतिभिः सेवकैर्वृतः पुरोधसंब्रह्मर्षेर्वसिष्ठस्यमहात्मनः १३ ययौतपोवनेदिव्येनानाद्रुमलताकुले नानापक्षिगणाकीर्णेस्वापदैश्चविराजिते १४ त्यक्तवैराश्चगोव्याघ्रास्तिष्ठन्त्यस्मिन्निराकुलाः मुनेस्तस्यांतिकंगत्वाप्रणनामपुनःपुनः १५ नोवाचकिंचिन्नौत्तस्थौबाष्पपूरितलोचनः ध्यानंविसृज्यसमुनिःकराभ्यान्नृपसत्तमम् १६ उत्थापयित्वासच्छिष्यंजगादऋषिसत्तमः नृपतेवदमाशीघ्रंकिमर्थमिहचागतः १७ किमर्थंम्लानवदनःकिमर्थंशोकसंकुलः पराभूतोवाशत्रुभ्योभ-

येवादानचोत्थितम् १८ तत्सर्वंमांसमाचक्ष्वजानोसिनिर्भयोयतः उवाचकृच्छ्रंनृपतिः शोकगद्गद्यागिरा १९ त्व
त्प्रसादेनभगवन्फलभंसर्वंएवहि परंत्विदानींभगवन्क्षोभोऽग्नितसंभवः २० राष्ट्रस्यदहनंजातंतत्सर्वंवदकिंप्रभो
ध्यानमासाद्यसमुनिर्मुहूर्तंज्ञानचक्षुषा २१ पश्यन्किमर्थमनलक्षोभोजातःस्वराष्ट्रके पुनःप्रोवाचसमुनिर्ज्ञात्वात
त्कारणंनृप २२ वसिष्ठउवाच शृणुतत्कारणंराजन्येनराज्यक्षयोभवत् पूर्णिमायांफाल्गुनस्य होलिकायाव्रतं-
शुभम् २३ त्वयाकृतंविधियुक्तंफलंतस्यनुनिश्चितम् तेनकर्मविपाकेनराष्ट्रदाहोभवत्क्षणात् २४ तच्छ्रुत्वानयेपुनस्त्वं
हिव्रतंकुरुविधानतः पूर्णिमायांफाल्गुनस्य भद्रासंगंपरित्यजन् २५ एवंतद्वचनंश्रुत्वाप्रणम्यऋषिपुंगवम् आ
ज्ञांगृहीत्वातस्यर्षेर्ययौस्वनगरंनृपः २६ चकारविधिवत्तच्चव्रतंफाल्गुनसंभवम् तेनव्रतप्रभावेनराज्यंस्वस्थमभूत्किल २७ एतत्तेकथितंराजन्विष्टिसंगमजफलम् तस्मात्सर्वप्रयत्नेनविष्टिसंगंपरित्यजेत् २८ अतानामुत्तमंनूनंभूयःकिं
श्रोतुमिच्छसि २९ इतिश्रीभविष्योत्तरपुराणे फाल्गुनमाहात्म्येपृथुनारदसंवादेषंडशोऽध्यायः २० ७
पृथुरुवाच मुनेफाल्गुनमासस्यपूर्णमास्यांकृतंस्मृतम् किंदानंकिंफलंतस्यकोदेवःकस्यपूजनम् १ काहुतासिनी
कस्माद्देपूजनंचउदाहृतम् तत्सर्वंकृपयाब्रूहिकृपांकृत्वाममोपरि २ सूतउवाच साधुपृष्टंमहाभागसावधानम-
नाभव पुरादैत्यकुलोत्पन्नोहोलनामामहासुरः ३ तपश्चक्रेपरमंहिमवद्गिरिकंदरे पंचवर्षसहस्राणिधूम्रपान
मधोमुखः ४ तपसावह्निनास्यतेजःपरमदारुणं तस्यतापेनसंतप्तादिविदेवगणान्नृप ५ सपर्वतवनंतेनज्वालारूप
मभूत्किल नगस्थाःपेलुः सर्वेतेहिपदाश्चचतुष्पदाः ६ ययुःकैलासनिलयंशिवदूतागिरिस्थितं ऊचुःसांबंतंतुदेवंस-
र्वोपद्रवनाशकम् ७ गणाऊचुः देवदेवगिरिष्टेतुनपस्तप्यतिदारुणं किंवादैत्योयगंधर्वोयक्षोरक्षसएवच ८ किं
नरोवाथमनुजोऽस्माकंतुननिर्णयः तस्यतापेनतप्तास्त्वावयंवेदितुमागताः ९ नारदउवाच एवमुक्त्वाशिवगणाःसं

निपत्यपपुर्नृप शंभुर्विचार्यमनसिज्ञात्वातंभक्तमात्मनः ययौतस्यांतिकेनूर्णंदृष्टवान्दानवंनृप भस्मनाधावलंशांतंचे
नसाभजनेशिवम् ११ रुद्राक्षमालावलयंप्रपरंशिवमीश्वरं नपश्यंतंचप्रात्मानंवल्मीकच्छन्नधिग्वह १२ उवाचभगवान्
शंभुर्नीलकंठोवृषध्वजः शिवउवाच उत्तिष्ठोत्तिष्ठदनुजपूर्णस्तवमनोरथः १३ शिवस्यवचनंश्रुत्वानेत्रेउन्मील्यदान-
वः व्यपश्यद्देवंजगतांकारणंप्रभुमीश्वरम् १४ ननामशिरसाभूमौकृतांजलिःस्तुवन्शिवं दैत्यउवाच देवदेवजग
न्नाथसंसारार्णवनारक १५ त्वमेवसर्वजीवानांकारणंतेनमोनमः १६ त्रिपुरांतकसर्वेशनमोमन्मथघातिने ईशानःस
र्वविद्यानांत्वंशक्तिःसर्वदेहिनां १७ अद्यमेसफलंजन्मदर्शनात्तवपादयोः जानेहंकृतकृत्योवैधन्यास्तेममपूर्वजाः
१८ दैत्यस्यगिरमाकर्ण्यसशिवोदीनवत्सलः वरंब्रूहिभद्रंतेयस्तेमनसिवर्तते १९ दैत्यउवाच यदितुष्टोसिदेवेश
तवभक्तिर्ददास्तुमे त्रैलोक्यकंदनेशक्तिर्ममाप्यस्तुजगत्पते २० शिवउवाच तथास्तुदनुजव्याघ्रंप्रतर्धानंययौ-
शिवः अंतर्हितेशिवेनस्मिन्दनुजःस्वगृहंययौ २१ उपयेमेसचित्वस्यप्रसूरस्यसुतांनृप तुहुंडानामविख्यातांत्रिशद्यो
जनविस्तृतां २२ घोरस्वनांमहत्रासांलंबोष्ठींलंबकर्णिकां तस्यांचोत्पादयामाससुतांपरमदारुणाम् २३ शतयोजन
विस्तीर्णांपिंगाक्षींदीर्घनासिकाम् लंबोष्ठींलंबकर्णांचदशनैरतिभीषणाम् २४ साकन्यावर्धतस्यगृहेविंध्यगिरेर्यथा
एवंसदनुजव्याघ्रबुभुजेगामनाकुलम् २५ शिवस्याराधनेभक्तिर्ददात्मासीद्दिनेदिने ननस्तैर्दनुजैःसर्वैर्मैत्रयित्वा-
विचारिन २६ कृत्वातस्यतदाबोधंसर्वेषांप्राणहारकं कालेनबलिनातस्यबुद्धिर्जातानराधिप २७ पीडनेसुरगंधर्वय-
क्षाणांमनुजस्यच अन्येषांचैवजंतूनांपीडांचक्रेसदारुणां २८ इतिश्रीभवि० फाल्गुनमा० एकविंशोऽध्यायः २१
६ नारदउवाच बलिनानेनदैत्येनभूमिसंस्थाश्चमानवाः ब्राह्मणानिहतानाजन्भ्रष्टाचारास्तथाकृताः १ यज्ञ
कर्मविहीनाश्चाग्निहोत्रविवर्जिताः स्नानसंध्याविहीनाश्चजाताःक्षितितलेद्विजाः २ एवहाहाकृतंसर्वंजातंक्षिति

तलंनृप एवंविजित्यभूलोकंस्वर्गंजेतुमथाययौ ३ आगतंदानवंदृष्ट्वासक्रराड्देवतागणैः ययौतस्यांतिकेतूर्णंयुयुधे
शरवृष्टिभिः ४ भिंडिमालैर्मुद्गरैश्चतोमरैःपट्टिशैस्तथा एवंदेवासुरगणैः कृतंयुद्धंसुदारुणम् ५ तदादेवगणैःसर्वं
दानवानांबलंहतं चुक्षोभसेनाधिपतिर्दनुजस्यमहात्मनः ६ सुमंगलोमहावीर्योदृष्ट्वानूर्णंरणेययौ युयुधेसगरेतेभ्यो
दारुणैःशरवृष्टिभिः ७ तदापेतुःसुरगणादिशोभेजुर्भयातुराः पलायमानस्वबलंविलोक्यसक्रराट्ययौ ८ सुमं
गलस्यशक्रस्ययुद्धंसमभवन्नृप शक्रःसपंचबाणैस्तुविव्याधदनुजाधमं ९ ह्याभ्यामस्यौध्वजौह्याभ्यांमुकुटंध्वनिपातितं
नः सारथ्येकेननिहतोदृष्ट्वाकोपसमाकुलः १० केशान्बध्वाचहस्तेनखड्गचर्मधरोसुरः पन्थाययौसविरथोहतारथो
हतसारथिः ११ चिच्छेदखड्गंतद्धस्तात्तदापाणिरयुध्यत यावन्मुमोचसगदांमहेंद्रस्यचवक्षसि १२ तावच्चिच्छेद
वज्रेणपातयामासचूर्णितां तेनवज्रेणबलिनाविहतोदानवःक्षणात् १३ सगतासुःपपातोर्व्यांदृष्ट्वादैत्यस्तुकोपं
नः बलंचनिहतंदृष्ट्वास्वयंयोद्धुमथाययौ १४ चचर्वदशनैर्जिह्मंकोपप्रस्फुरिताधरः महेंद्रंलक्ष्यदनुजश्चिक्षेपशरसं
हतीः १५ महेंद्रंव्याकुलंकृत्वासिंहनादंचकारह मुहूर्तेनततःप्राप्यचेतनामात्तकार्मुकः १६ युयुधेचपुनःशक्रो
दानवेनमहात्मना दैत्यस्यचमहावक्षेवज्रंचिक्षेपदेवराट् १७ शिलायामुपलक्षेयायथाभवतिशौनक तद्वज्रस्य
हिगतिर्ध्रुवंजातानराधिप १८ तस्माद्बुद्धीयनद्वज्रंलग्नंनागकपोलके तस्यप्रहारात्सत्रस्तोगतोसौमेरुकंदरे १९ पेतु
श्चसर्वेत्रिदशागतेतस्मिन्नराधिपे दैत्येंद्रत्वमरावत्यांस्वसैन्यपरिवारितः २० ययौचानिबलोन्मत्तोदानवोबुभुजेदि
वम् दैत्येंद्रोमाययादध्रेरूपाणिचत्रनेकशः २१ सूर्यस्यतपनंचक्रेअधिकारंतथैदवम् वामेचपवनंदीप्तंचक्रेवैवन्हि
कर्मच २२ यमस्यवरुणस्यापिकुबेरस्यमहात्मनः अन्येषांचैवदेवानांगंधर्वाप्सररक्षसां २३ सर्वेषामधिकारांश्चस्वय-
मेवावतिष्ठते स्वर्गान्निराकृतास्तेनशेषादेवगणाभुवि २४ विचेरुश्चयथामर्त्यादुःखदावाग्निपीडिताः सूतउवाच

एवंदैत्येनभोविप्राः पीडितादेवतागणाः २५ मेरोर्गुहायांमिमिलुः विचारंचक्रुरर्दिताः चिंतयामासुरव्यंतेभगवंतंजगद्गुरुं २६ देवाऊचुः पाहिविश्वेशसर्वात्मन्सर्वव्यापिन्नमोस्तुते अस्माकंदुःखनाशायस्फरवद्दायनमोनमः २७ यदा यदाहिविश्वस्यदानवानांभयंभवेत् तदातदावतीर्णस्त्वंनिर्भयंचजगत्कुरु २८ अधुनाकगतस्त्वंहिदेवदेवरमापते त्वंहिनागनिरस्माकंनास्तिनास्तिजगत्पते २९ करुणोदितमाकर्ण्यदेवानांजगदीश्वरः आविर्भूतस्ततः सद्योयत्रदेवगणावसन् ३० इतिश्रीभविष्योत्तरपुराणेफाल्गुनमाहात्म्येद्वाविंशोऽध्यायः २२ ऋ. नारदउवाच पीतांबरंचतुर्बाहुंशंखचक्रगदाधरं कोटिसूर्यप्रतीकाशंजगद्वानंदकारकम् १ दृष्ट्वादेवंस्फुरगणाःप्रणेमुश्चमुहुर्मुहुः मृदासनेसमारोप्यपूजयामासुरच्युतम् २ स्तवंचक्रुःसर्वेनेनृतुश्चाप्सरोगणाः एवमस्तुतोदेवैश्चकपाणिरुवाचह ३ श्रीभगवानुवाच भवत्कार्यंमयाज्ञातंदानवस्यवधादिकं शिवभक्तिबलीदैत्योदत्तः शंभुवरेणाहि ४ तथापि तंहनिष्यामिकियत्कालंप्रतीक्ष्यतां उवाचैवंस्फुरगणंजगामांतर्हितोहरिः ५ गतेनस्मिन्हरौदेवाभक्ष्यभोज्यचित्तर्जिताः प्रतीक्षांतस्यकुर्वंतःस्थितास्तेमेरुकंदरे ६ अस्फुरोबुभुजेविघ्नंसमग्रंगनकंटकं शिवात्सलाभिनापूर्वकन्यालेनापिरासिता ७ साह्योलिकेतिविख्यातासर्वदेवभयंकरी पृथुरुवाच याह्योलिकात्वयाख्याताजाताकस्माद्भयंकरी ८ शंभोःपलायिनाकस्मात्तत्समासेनमेवद् नारदउवाच फाल्गुन्यांपौर्णमास्यांवैमहोत्सवोहोलिकार्चनम् ९ येकुर्वंतिनरास्तेषांसर्वंभवतिशोभनं शौनकऊवाच सूतसूतमहाभागहोलिकायात्वयोदिता १० साकाकिमर्थमुत्पन्नापौर्णमास्याचपूजनं कस्माकुर्वंतिविद्वांसएतदाचक्ष्वसांप्रतम् ११ सूतउवाच अत्रतेकथयिष्यामिकथांपौराणिकींशुभां पुरानुमथुरेदेशेदुंदुभिर्नामविश्रुतः १२ सम्राट्दैत्यकुलोत्पन्नः शशासजगतीतलं ग्रामंग्रभागंचराजायज्ञारंभमयाकरोत् १३ विनेंद्रंयजनातेनविष्णुद्वेषवतानदा ननस्तादेवताःसर्वायज्ञभागविवर्जिताः १४ देवेंद्रंप्रणताःप्रोचुःसर्वे

दुंदुभिचेष्टितं महेंद्रोपिचनज्ञात्वाक्रोधाद्दीप्तोनलंवमन् १५ सर्वेदेवाश्चकुपिताःमुखेभ्यश्चानलंवमन् वमनांतानलाःस
वैएकीभूताभयानका १६ तावदेवाभवन्नारीत्विषाव्याप्तजगत्त्रया ऊर्ध्वकेशानखानिम्ननाभिकाचदिगंबरा १७ पिंगाक्षी
वज्रदशनारवङ्गनिर्ह्राभयानका अनुदेहीनिब्रुवाणाश्चाज्ञांदेहिमयोचितां १८ तयोक्तांगिरमाकर्ण्यदिदेशाज्ञांपुरंदरः ग
च्छत्वंसुभगेमर्त्यलोकेशीघ्रंममाज्ञया १९ दुंदुभेश्चमरवंसायंक्रतुभिःसहितंहन इतिप्रबोधितादेवैःसुभगाभूतलंय-
यौ २० मरवंविध्वंसयामासहव्यंसर्वमरवादनि हुतमन्यानिसायस्मान्तस्मात्सेयंहुताशनी २१ ऋत्विजोनिहताःसर्वेयज्ञ-
पात्राणिखादंति शुक्रोगृहीत्वाकेशेषुस्वयोन्यांस्थापितोबलात् २२ यत्रयत्रददर्शायहव्यकव्यादिकाःक्रियाः तत्रतत्रच
सागत्वाविध्वंसमकरोद्बलात् २३ एवंयज्ञादिकंसर्वेवर्जितंजगतीतले हताःकामदुघागावोयाज्ञिकाश्चैववाडवाः २४ एव
पर्यटमानायाभगाच्छुक्रोविनिस्सृतः हुताशनीशशापेनिभगरूपाभविष्यसि २५ यथैवेंद्रःपुराशप्तोसहस्रभगसंवृतः
तथात्वममशापेनभववैभगसंकुला २६ शुक्रशापेनसासद्योभगैश्चानेकशोयुता तथापिसाबभौराजन्सहस्रभगमा-
लिनी २७ लोकेविख्यातिमायाताशक्रंधर्तुप्रधाविनि शक्रोप्यंतर्दधेभीत्यातस्याश्चनिजमायया २८ शुक्रंनिरीक्षितुं
सापिबभ्रामपुरपत्तने भ्रमतोदृष्टवंतंब्राह्मणंवानरोत्तम २९ तंभगेनिक्षिपन्निशतयोजनविस्तृता एवसर्वेद्विजश्रेष्ठा
राजानोन्येनरास्तथा ३० भगेषुसर्वेनिक्षिप्ता हाहाकारोत्थभूत्तदा विनाशब्देनतेशंखंकेवलेनमुखेनच ३१ करसंयोग
मात्रेणचक्रुःकोलाहलंतथा पलायनपराःसर्वेपृष्ठलग्नाभगांकिता ३२ एवंतेमुनयःसर्वेहोलिकाभयविह्वलाः नप-
श्यंतेन्यशरणाद्धिमवंतंगिरिंगताः ३३ विष्णुमुद्दिश्यतेसर्वेतपस्तप्तुंप्रचक्रमुः गतेषुकतिमासेषुतपसातेनचारुणा ३४
रूपसंपन्नोद्विभगवानाविरासीत्तोद्विजाः ततस्तेमुनयःसर्वेस्तुत्वानत्वायथाक्रमं ३५ निवेद्यसर्वंस्वदुःखंपुरुषायम-
हात्मने पुरुषउवाच ज्ञानमेवास्तितत्सर्वंहोलिकायाःकृतंपरं ३६ शक्रेणनिर्मितोकोपात्तस्यैब्रह्मावरान्ददौ अव

ध्यासर्वभूतेषुयथेच्छसिनथाकुरु ३७ अहमेवास्मिवरदोयदाशक्रेणशापिता नयासाकंययौशक्रः शयानंमाच्यबोध-
यत् ३८ दत्तनिवेदयामासनादक्षाभगसंयुतां कृपयापरयाभक्तांसांत्वयामाससादरं ३९ योनयः सर्वगात्रेषुसंजाताः
कविवाक्यनः ताःसर्वामत्स्वरूपाःस्युःविष्णुर्योनिरितिस्मृतिः ४० शिवप्रसादात्तेमुक्तिःख्यातालोकेभविष्यसि एत
स्मात्कारणादेवनाहंनावधितुंक्षमः ४१ यदाशिवःप्रसन्नोभूद्दुष्टदानवदर्पहा सर्वधर्मसत्यकरीतांस्तेणाद्धानयिष्य
ति ४२ इतिविष्णुवचःश्रुत्वासर्वेतेभयविह्वलाः दैवंविचिंतयामासुरुत्वश्चैवंपरस्परं ४३ सर्वेषांशरणंविष्णुर्दैत्यानाम
शनिःस्वयम् सोयमेवंविधंवक्तिअहोचित्राविधेर्गतिः ४४ ततस्तेमुनयःसर्वेकैलासंगिरिशालयं गत्वैवोग्रतपश्चक्रुः
शयनाहारवर्जिताः ४५ शिवंप्रपूजयामासुरसालकुसुमैःशुभैः नलेभिरेन्यपुष्पाणितस्मात्तैरेवनित्यदा ४६ एव
पूजाजपैर्होमैस्तर्पणैर्ध्यानसंभ्रमैः शिवमाराधयामासुस्तुतिस्तोत्रैरनिंदिताः ४७ ततःप्रसन्नोभगवानाविरासी-
त्कृपानिधिः फाल्गुनस्यासितेपक्षेचतुर्दश्यांमहानिशि ४८ सर्वेषांपश्यतांतत्रऋषीणांविजितात्मनां करेदधानंप
रशुंमृगंचवरदाभयम् ४९ पंचवक्त्रंदशभुजंत्रिनेत्रंचंद्रशेखरम् मृडानीसहितंव्याघ्रगजचर्मविराजितं ५० विभूति
धवलशांतरुंडमालाविराजितं भुजंगभूषणयुतंनीलकंठंत्रिशूलिनं ५१ एवंविधंशिवंदृष्ट्वातेतुष्टुवुःप्रचक्रमुः ऋ
षयऊचुः नमःशिवायशांतायनमस्तेलोकसाक्षिणे ५२ नमोभवायरुद्रायपशूनांपाशविमोचिने त्रिशूलधारिणेतु-
भ्यंनमःखट्वांगधारिणे ५३ कामारयेनमस्तुभ्यंभीषणायनिषंगिणे स्तुत्वेवंदेवदेवेशंकथयामासुरात्मनः दुःख-
स्यकारणंसर्वंहोत्तिकाज्ञानितंपरं ५४ ततःप्रभृतिसारात्रिःशिवरात्रीतिविश्रुता शिवप्रीतिकरानित्यंत्रिषुलोकेषु-
सर्वदा ५५ तस्यांजागरणंशंभोः पूजनंचाभिषेचनं अर्पणंबिल्वपत्रस्यरुद्राध्यायस्यपाठनं ५६ तत्कथाश्रवणंसम्य
क्गुणाश्चशिवसंभिधौ चतुर्दश्यांविशेषेण आम्रपुष्पैःसपूजनं ५७ येकुर्वंतिनरास्तेषांगेहेलक्ष्मीःस्थिराभवेत्

ज्ञाननोज्ञाननोवापिशिवराज्यामुषोषितः ५८ आम्रप्रसूनैर्यैर्चैतसयातिपरमंपदम् अत्रतेकथयिष्यामिइतिहासंपुरा
तनं ५९ यस्यश्रवणमात्रेणसर्वपापैः प्रमुच्यते मिथिलायांपुराविप्रःक्षुधन्वानामविश्रुतः ६० अधर्मनिरतोनित्यंके
वर्तकुलपांसनः नित्तांतंमृगयासक्तोनृतनामिषभोजनः ६१ पुत्रदारैःपरित्यक्तोहिंसासंसक्तमानसः कदापर्युषितं-
मांसंनभुंक्तेदुर्मतिःखलः ६२ एवप्रतिदिनेकुर्वन्हननंमृगपक्षिणां पातकेनसमायुक्तोबहुकालोव्यतिक्रमत्
६३ कदाचिद्दैवयोगेनमृगयायैवनंययौ नलब्धश्रमनातेनमृगयूथंवनांतरे ६४ क्षुधयापीडितोजानोगतस्तंनि-
ग्रतेजसि नयथोस्वगृहतानरिक्तपाणिःक्षुधातुरः ६५ इतश्चेतश्चविचरन्व्याघ्रमेकंददर्शसः क्षुधितंतरसायुक्तं
धावमानवनांतरे ६६ तेनापिधीवरोदृष्टोययौनाबज्जिघांसया पलायनपरोजानस्तस्माज्जीवितुमक्षमः ६७
व्याघ्रोपिचययौपृष्ठेक्षुत्पिपासाकुलोभृशं नपश्यदन्यंशरणंतदायानोवनांतर ६८ भ्रममाणोवनेघोरेव्याघ्रभी-
त्यापुलिंदराट् ददर्शाम्रवनंतत्राम्रारुरोहाम्रपादपं ६९ पुष्पितंभ्रमरैर्जुष्टंशोभितंनवपल्लवैः तस्याग्रशाखामारु
ह्यजल्पन्शिवशिवेतिच ७० अहोकिमेतत्संजातंसर्वसत्वभयंकरं निराहारःस्थितोवृक्षेकथंजीवामिसांप्रतं
७१ व्याघ्रोपिधीवरंदृष्ट्वाचूतवासनिवासिनं अशक्तोवृक्षमारोढुमूलमाश्रित्यसंस्थितः ७२ व्याधोपितंसमालो-
क्यनिषण्णंक्रूरनिःस्वनं गतोवानगतोचेतिमार्गमाणःप्रतिक्षणं ७३ संहतान्दृष्टिपथगान्पक्षवान्कुक्कमान्वि
तान् ऊर्ध्वंनिक्षेपयामासनरवैश्छित्वामुहुर्मुहुः ७४ तत्रासीत्पिहितंलिंगंयत्पूज्यंबहुकालिकम् तत्रैवतानिसर्वा-
णिपतितानिद्विजर्षभाः ७५ पूर्वजन्मकृतैःपुण्यैर्योगोयंनात्रसंशयः पतितंकिमिति भात्याव्याघ्रोलिंगांनिकंयथो ७६
व्यत्रैवचूतशाखायांव्याधोभवतिनिश्चितं निद्रयाविह्वलीभूतःपतिष्यतिनसंशयः ७७ व्याधोपित्रोटयामासकुक्क-
मानिपुनःपुनः शीतार्तःक्षुधयाव्याप्तःस्विद्यन्जल्पन्शिवेतिच ७८ एवंजागरणरात्रौउपवासादिपूजनं शिवलिंगस्य-

साभिध्यंव्याघधीवरयोःपरं जातंतपस्यप्रभावेणद्वयोश्चविमलामतिः ७९ एवंरात्रिमनिक्रम्यप्रभातेविमलेसति
चित्तेविचारयामासधीवरोविमलाशयः ८० जन्मतोहंमहापापीपापकर्मरतःसदा नमेस्वल्पलेशोस्तिअतोमेकागतिं
र्भवेत् ८१ अतःपरंकरिष्यामिपुण्यंपरमदुर्लभम् व्याघ्रोयंवनिनांश्रेष्ठःक्षुधितोममयाचते ८२ अतोभवतुमद्भात्रंपा
रणायैमृगद्विषः अयमेवपरोधर्मोनापरोममदृश्यते ८३ इतिसंचिन्त्यमनसिहत्वादवतनात्च गत्वाव्याघ्रंतिकंब्रह्म
न्प्रणम्यमधुरंवचः ८४ व्याधउवाच भोभोव्याघ्रमृगश्रेष्ठश्रमितोसिममांतियेः कुरुष्वपारणंशीघ्रंममदेह
नमानद ८५ व्याघ्रोपिचिंतयामासशिवरात्रिप्रभावतः व्याधंसत्ववतांश्रेष्ठंकथंहन्मिचसांप्रत ८६ पूर्वकर्मविपाके
नजातोहंहिंसकःपरः अतोहंनकरिष्यामिहिंसांपरमनिंदितां ८७ प्रायश्चित्तंकरिष्यामिदेहत्यागेननान्यथा विचिं
तयन्नुवाचाथव्याधंधर्मभृतांवरं ८८ व्याघ्रउवाच गच्छत्वभवनंभद्रंहनमांपापकारिणं. हतेमयिनदोषस्तेपरंपुण्य
मवाप्स्यसि ८९ नोक्षितस्त्वत्समोलोकेसर्वभूतदयापरः नाधमोमत्समोलोकेत्यतोमांमोचयप्रभो ९० अस्मात्कलेवरात्
साधोयदित्वंनेवमोस्यसे प्रायोपवेशनेनैवत्यात्मानंमोचयाम्यहं ९१ पुनरप्याहतंव्याधःकिंमांवंचयसिप्रभो अनुप
योगिनानेनममदेहेनसांप्रतम् ९२ इत्युक्काधोमुखोभूत्वापपातामिषपिंडवत् जातापुष्यदृष्ट्वतयोर्विवदतोर्दिवः शी
घ्रंविमानमप्यागात्सशैवगणसंयुतं ९३ त्यक्तदेहौतुतौभूत्वाविमानवरमाश्रितौ शिवरात्रिप्रभावेणशिवरूपौबभूवतुः
९४ गतौकैलासशिखरंशिवसायुज्यतांगतौ शिवरात्रिप्रभावेणत्वात्मपुष्पैःप्रपूजनात् ९५ शिवेनप्रीतिभावेनशृंगिणस्तु
समोक्षतौ सचंडइतिविख्यातःसर्वलोकेषुविश्रुतः विनाचंडेनयोमोहाच्छिवपूजनतत्परः ९६ सयातिनरकंघोरंयावच्च
द्रार्कतारकाः यथाऋषस्तथाचंडस्ताभ्यामेवप्रदक्षिणा ९७ सोमसूत्रीतिविख्यातःशिवप्रीतिकरीसदा व्याघ्रस्यप्रीति
भावेननिकुंभइतिविश्रुतिं ९८ कृतवान्तस्यतच्चर्मपरिधानायकेवलम् शिवरात्रेश्चमाहात्म्यमात्मपुष्पार्पणेफलम्

९९ इतिश्रीभविष्योत्तरपुराणेतपस्यमाहात्म्येत्रयोविंशोऽध्यायः २३ ऋषयऊचुः कथंनाशितवान्रांक्षृहो-लिकांजनपीडकां सूतउवाच ततस्तेमुनयःसर्वेरुक्त्वानत्वासदाशिवम् १ होलिकाचरितंसर्वंकथयामासुरादरात् देवकाचिन्महाघोराहोलिकानामविश्रुता २ अनेकभगसंयुक्तादिग्वस्त्राचभयानका तयाभूमंडलंसर्वंसर्वकर्मबहिष्कृतं ३ नशक्तास्तद्ध्वंकेपिब्रह्मोपेंद्रादिनिर्जराः कथंतुमर्त्यलोकास्तेतद्भेजीवितुंक्षमाः ४ राजानोराजपुत्राश्चयुद्धेधृत्वा स्वयोनिषु भस्मत्वंप्रापितानूनंब्रह्मदत्तवरोद्धता ५ तयानिपीडिताःसर्वेवयंत्वांशरणं गताः त्राहिनोदेवदेवशविना थास्त्वंयेसंस्थिते ६ श्रीशिवउवाच ज्ञातंऋषिगणाःसर्वंतयायच्चरितंपरं अधुनानाशयिष्यामिहोलिकांवरगर्विता ७ इत्युक्त्वाऋषभारुह्यत्रिनेत्रोहोलिकांप्रति यथौतस्याजपरशंहोलिकानिधनेच्छया ८ ततःसातर्हिताजाताय योहोलासुरंरयात् उवाचतंमहादैत्यंकन्याहृतवरक्षमां ९ अनपत्योथदनुजतयेतिप्रतिजज्ञिवान् नंशशापशिवः कोपाद्दिष्ण्यस्त्वंनाशयिष्यसि १० सोपिकन्याबृहद्भार्त्रीहोलिकानामुविश्रुतां दत्तवान्पंचशीर्षायदानवायवराशिने ११ साहोलिकाव्यवायेनुरतान्यैर्दैत्यबालकैः जातेषुहुतियेकालेकदातत्समयेसुरः १२ दृष्टवान्सोपितत्कर्मताडयामासतांस्त्रियम् नाहयित्वाबहुतरंवरमारोप्यहोलिकां १३ गोमयैस्ताडयामाससर्वैःपौरजनैःसह चतुष्पथभवांधूलिंचवर्षमस्तकेतथा १४ करीषपुटजंशब्दंचक्रुस्तेमनुजानृप एवंविभत्संनस्यास्तुकारयित्वाजनैस्तदा १५ त्यक्त्वान्समहारण्येययौनागरिकैर्गृहं होलासुरेणनकिंचित्तत्तातंनरपुंगव १६ नययौसापितुर्गेहंलज्जयापरयावृता नगस्यविवरेगुप्ताचसत्तत्कर्मआचरत् १७ मार्गेयेपथिकायांतिपशुस्त्रीपुरुषादयः बलात्तान्स्वगृहंनीत्वाइतिसाकृत्यमाकरोत् १८ पुरुषेभ्यश्चसाभोगंस्त्रीणांभगविदारणं पशूनांभक्षणंनित्यंनित्यंचक्रेत्विदंत्रयम् १९ कदाचिद्दैवयोगेनतेनमार्गेणचानघ अहमप्यागतोराजंतयादृष्टोययौचरन् २० अन्यजन्मार्जितेनैवसुकृतेनहिदर्शनं नूनंभवतिसा-

धूनांदर्शनात्गतकल्मषः २१ नरोभवतिचात्रास्तिप्रमाणंचेदशास्त्रयोः गंगातापंहरिःपापंदैन्यंकल्पतरुस्तथा २२ पापं-तापंचदैन्यंचहंतिसाधुसमागमः सूतउवाच दर्शनान्नारदमुनेस्तस्यावैमुनिपुंगवाः २३ धर्मरतिस्तुसंजातानष्टनामसुनिंविभुं उवाचवचनंदीनंहोलिकागतकल्मषा २४ होलिकोवाच भोमुनेऽधुनामत्यंतारयस्वजगत्पते पातकानामनेकानांपुंजोहंकेवलंमुने २५ एवंतयाबहुविधंस्तुतोदेवर्षिसत्तमः उवाचवचनंतांतुजानात्वमघवर्जिता: २६ गिरेःपृष्ठेहिमवतोगच्छत्वंशिवमर्चय शिवपंचाक्षरींविद्यांदत्तवान्नारदोमुनिः २७ लब्ध्वातस्मात्परांविद्यांसाजगामहिमाचलं नारदउवाच मयाकृतोपदेशात्सात्यकरोदुष्करंतपः २८ होलासुरोपित्रिदिवेभुक्त्वाभोगाननेकशः स्थितस्तावन्महाविष्णुस्तन्नाशोद्यममाकरोत् २९ द्वारस्थंविजयाख्यंचवेषंदत्वासुरस्यच ऊचेत्वंगच्छदैत्याग्रेवक्ष्यतेसुरांतकम् ३० किमास्तित्रिदिवेदैत्यवैकुंठेगच्छसांप्रतम् तत्रास्तिजलजादेवीरूपयौवनशालिनी ३१ हननस्यास्तुभर्तारंराज्यंकुरुतयासह एवमाज्ञाप्यतंदूतंप्रेषयामासदानवं ३२ क्षणाद्दूतोययौतूर्णंरत्नाद्वोलासुरांतिकं प्रणम्यविधिवत्तस्मैउवाचमधुरंवचः ३३ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येचतुर्विंशोऽध्यायः २४ ७ दूतउवाच दैत्येश्वरमहाबाहोवैकुंठादागतोस्म्यहं पर्यटन्बहुलंदेशममरैश्चनिराकृतः १ अस्माकंकुलदीपस्त्वमतस्त्वांशरणंगतः महाबलमहावुद्धेवैकुंठेहरिचल्लभा २ वर्ततेऽधिकृतानाथविधिनापिननिर्मिता नैवतादृक्क्वचिद्रूपंभूतंभव्यंजगत्पते ३ तांविनातवनोभातिराज्यंत्रिभुवनस्यच सालक्ष्मीर्यादतेगेहेनास्तिदैत्येंद्रकुत्सिता ४ नावल्लक्ष्मीर्नवैभातिनिःसत्याइवजंतवः तदानिःकंटकंराज्यंयदासौनिहतोहरिः ५ तदातद्धिरमाकर्ण्यक्रोधप्रस्फुरिताधरः शिववाक्यनसस्मारकालचक्रेणमोहितः ६ उवाचवैष्णवंदूतंसदैत्योहर्षपूरितः दैत्यउवाच वैष्णवत्वंमुमूर्षुवंसदूतयथासुखम् ७ इतिविश्वास्यतंदूतंपंचवक्त्रंजगामह भोःपंचवक्त्रस्वबलैर्बहुभिःपरिवारितः ८ वैकुंठंगच्छसहसानि

हत्वजगदीश्वरम् आनयस्वजवात्पद्मामादेशान्ममसानद ९ तस्यादेशात्पंचवक्त्रः स्वसेनांचतुरंगिणीं चकारसिद्धांवै-
कुंठसदूतस्त्वरयाययौ १० सदैत्यः सुकृतीमन्येसशरीरोपिगच्छति वैकुंठनिलयंराजन्गतास्करिवदृश्यते ११ दृष्टवान्
रमयासार्द्धंभगवंतंजनार्दनं प्रोवाचउद्धतंराजन्त्यजएतादृशींस्त्रियं १२ यदिजीवितुमिच्छास्तितर्हिगच्छइतोद्रुतम्
दानवंकथयेष्यामिमयासनिहतोहरिः १३ नोचेत्त्वामधुनाहन्मिक्षणमात्रेणनिश्चितं श्रीभगवानुवाच होलासु
रेणपहितोबलवान्बलसंयुतः १४ मांहत्वाजलजांनेतुमुद्यतःकिंकरोमिते पंचवक्त्रोपिजलजांयावद्धर्तुमुद्यतः१५
तावच्चक्रेणभगवानपातयत्ततोच्छिरः ततोहाहाकृतंसर्वंदैत्यसैन्यंदुरात्मनः १६ योहमभ्याययौविष्णुंभिंडिपालै
श्चपट्टिशैः युगपत्सैनिकाःसर्वेववर्षुःशरसंहतीः १७ पक्षींद्रःक्षोभमापन्नःपातयामासदानवान् कांश्चिच्चंचुप्रहारेण
पक्षक्षेपैस्तथापरान् १८ नखैर्विदारयामासभक्षयामासचापरान् एवंतस्यबलंसर्वंपक्षिराजेनघातितं १९ केचित्पे
लुर्दिनिष्कनाययुर्होलास्करंद्रुतम् आचख्युर्दैत्यराजायजातयत्संगरेहरेः २० दैत्याऊचुः वयंत्वदात्तयादेवगनाश्च
हरिसन्निधौ उक्तंत्वंगच्छभगवन्त्यक्ताएतादृशींस्त्रियम् २१ निशम्यतेनबलिनाचक्रेणनिहतोरुषा सगतास्कःपपा
तोर्व्यांपंचवक्त्रोमहाबली २२ वयमप्यनिकुद्धास्तंयुगपद्धतुमुद्यताः एतस्मिन्समयेस्वामिन्महापक्षीसमागतः २३
पक्षिणातेनहिबलं अस्माकंनिहतंरणात् अस्माभिस्तस्यपुरतःस्थातुंनाथनशक्यते २४ आज्ञादेहिगमिष्यामःस्व
स्थानंदानवोत्तम जामातुःपंचवक्त्रस्यनिःशेषस्यबलस्यच २५ श्रुत्वातान्यांश्चनिधनंसभूमौनिपपातह हावत्सहापंच
शिरःक्वगतोसिमयाविना २६ एवंशशोचबहुलंपुनर्भूमौपपातह इतिशोकातुरेदैत्येपुत्राःप्रकृतिभिर्युताः २७ ययु
श्चसांत्वयांचक्रुःशोकव्याप्तंमहासुरं चक्रुश्चशपथान्पुत्राःपितुरग्रेनरोत्तमाः २८ शोकंत्यजमहाबाहोहनिष्यामोहरिंरणात् पश्यास्माकंतुसामर्थ्यंसर्वलोकभयंकरं २९ अहत्वादुष्टचरितंहरिंदानवकंटकं यमाग्रेनुनवाग्रेवैव्रजामःपितृ-

हागतिं ३० इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येपंचविंशोऽध्यायः २५ ॐ नारदउवाच एवंबहुविधं पुत्रैः सामात्यैः सांत्वितः प्रभुः चकारकोपमतुलंजिघृक्षन्भिचरोदसौ १ चचर्वदशनैर्जिह्वांज्वालाव्याप्तदिगंतरः गृहीत्वा पितुराज्ञांनेसिद्धांकृत्वास्वचाहिनीं २ विनद्यशरवनादोच्चैर्वादयामासकरानकान् अनेकानिचवाद्यानिविचित्राणिमहात्यपि ३ दैत्यास्तेवादयामासुर्घोषव्याप्तदिगंतराः तद्घोषस्तदिवंभित्वावैकुंठंचजगामह ४ भगवानपित्वांसेनासन्नद्धो चाकरोन्नृप निर्गतादानवास्तूर्णंत्याजग्मुर्विष्णुसन्निधौ ५ ववर्षुःसायकांस्तीक्ष्णांप्रावृट्कालेघनाइव केचिच्चविसिपुःशक्तीर्भिंडिपालानथापरे ६ केचित्खड्गप्रहारैस्तंयुगपद्युयुधुर्मुधि ताः तेषांप्रहारान्विविधान्निवार्यजगदीश्वरः ७ ववर्षस्वशरान्दिव्यान्तेत्रस्ताश्चमहासुराः केचिद्दूरादिशःपेतुःकेचिन्निपतिताभुवि ८ पलायमानंस्वबलंविलोक्यामर्षमुद्वहन् होलस्यज्येष्ठस्तनुजोययौयुद्धायतंहरिं ९ हरिस्तंक्रोधमापन्नस्तद्देहान्निर्गतः पुमान् पिंगाक्षोमूर्तिधवलःसाक्षाच्छेषइवापरः १० बृहद्रथंददौनस्यभगवान्जगदीश्वरः ययौसदानवंयोद्धुंबलवीर्यमदोद्धतं ११ अभवत्तमथायुद्धंमुनिविस्मयकारकं विव्याधपंचबाणैस्तंदानवंदेवकंटकं १२ एकेनमुकुटंछित्त्वाहताश्वाश्चतुरेणच चिच्छेदैकेनचध्वजमपरेणापिसारथिम् १३ कार्मुकंछेदयामासकरस्थंदानवस्यच सच्छिन्नधन्वाविरथोहताश्वे हतसारथिः १४ गदांगृहीत्वावेगेनक्षिप्तातस्यरथोपरि गदापातेनदैत्यस्यरथःसारथिनासह १५ गतस्तुचूर्णतांक्षूनमवन्यांवैष्णवोपतत् अग्निदग्धोभवत्तत्रवङ्गःसकोशस्तमतांव्रजन् १६ नदासवैष्णवःशूरोत्थायक्रुद्धोबभूवह गदांचिच्छेदतद्धस्तात्कुठारेणातदाबली १७ गदांहिभिन्नामालोक्ययोजयामासतोमरं कुठारंछेदयामाससत्रिशूलंचमूर्धनि १८ त्रिशूलेनहतोदैत्यःपपातधरणीतले गतासुश्छिन्नभिन्नश्चज्ञात्वातस्यानुजोबली १९ वीरसेनोमहाक्रूरः

+ नवाग्ने हरिंअहत्वा यदिअनामस्तर्हि यमायेपितृ ःगतिंव्रजामः इत्यन्वयःपितृभः अगतिं दुर्गतिं

कोपादरुणलोचनः शक्रोऽचसक्षणंदैत्योययौयुद्धायसत्वरः २० तिष्ठतिष्ठेतिप्रलपन्ययौतस्यांतिकंरयात् त्रीन्शरान्योजयामाससन्निशूलंचजघ्नहे २१ त्रिशूलेनहतोदैत्योपपातधरणीतले गतासुश्छिन्नभिन्नश्वज्ञात्वातस्यानुजोबली २२ पुनःप्रापमहावीर्यश्चेतनामात्तकार्मुकः स्वर्णपुंखंशरंदूतमिवस्थितं २३ योजयामासचतुरोनत्वाश्रीजगदीश्वरम् क्षणद्युतिसमोबाणोनलक्ष्योदानवेनच २४ जघाञ्जहारतच्छीर्षसर्वेषांपश्यतांनृप पपातधरणीपृष्ठेवज्राहतइवाचलः २५ ततोहाहारुतंसर्वदैत्यसैन्यंदिशोदश निर्गतंवैत्यशक्तास्तेसैनिकाचेष्णवंप्रति २६ होलंनिवेदयामासुःपुत्रसंहननादिकं श्रुत्वाशक्रोऽनिपतन्कराभ्यांताडयन्महीम् २७ मूर्छामवाप्यमहतींसावधानः क्षणाद्भूत् स्मृतिःप्रकुपि श्रेष्ठोययौतस्यांनिकंरयात् २८ पुनश्चकारहिपणंयेनस्वनिधनंभवेत् सिंहांचकारमहतीम्स्वसेनांचतुरंगिणीम् २९ एकादशाक्षौहिणीकामध्येभातिमहाक्षरः ययौवैकुंठभुवनंमृत्युनाकर्षितोयथा ३० ददर्शपुंडरीकाक्षंववर्षशतसायकान् ययौसवेष्णवःरत्नूर्णकुठारेणाहिचिच्छिदे ३१ स्वर्णपुंखंशरत्यक्त्वाछेदयामासकार्मुकं छिन्नधन्वाबलीदैत्योधनुरादायचापरं ३२ स्वशरंयोजयामासपरस्यप्राणहारकं वैष्णवोन्यपतद्भूमौवज्राहतइवाचलः ३३ तंदृष्वापक्षिराड्योद्धुंनिर्ययौदानवंरयात् पक्षीचंचूप्रहारेणचूर्णयामासतद्रथम् ३४ धनुश्चिच्छेदनरवरैः पक्षपातैर्महारयान् छिन्नधन्वाहतास्वश्वधिरथोहतसारथिः ३५ बाहुयुद्धेनयुयुधेतेनोद्भैरनिवारिणा बलिनातेनदैत्येनपक्षिराजस्यपक्षकाः ३६ उत्पाटयित्वासहसानिक्षिप्तागिरिकंदरे मुहूर्तादैष्णवःप्राप्यचेतनामात्तकार्मुकः ३७ ययौयुद्धायतदैत्यंदीप्तौशलभोयथा गदायुद्धंपुनस्तेनकृतवान्दनुजेश्वरः ३८ बाहुयुद्धंचकृतवान्देवविस्मयकारकम् पद्मामादाय तंदैत्यंरत्यक्तवान्व्योमंडले ३९ एवंशरबलंतेननिहतंदानवेनच तंदृष्वानिर्ययौयोद्धुंस्वयंश्रीजगदीश्वरः ४० युयुधेतेनदैत्येनवर्षाणामयुतंनृप दैत्योयदाम्रवध्योभूत्तदासजगदीश्वरः ४१ निर्मायमहतीमायांवैष्णवींलोकमोहिनीं

हरिरूपात्मधनेकाश्वसर्वतः पुरुष स्थिताः ४२ तदाभवद्व्याकुलात्मासंपश्यन् सर्वतोहरिं शरान्ववर्षुः सर्वेतेनसमर्थोनि
वारितुं ४३ तदाचक्रेणचिच्छेदशिरस्तस्यनराधिप होलिकायाश्चन्यपतत्तस्या
दानवस्यशिरोनृप ध्यानंविसृज्यसाकन्याज्ञात्वाशीर्षंपितुस्तदा ४५ शशोचकरुणंदीनाहातातक्वगतोसिमां दीना-
त्यक्त्वात्र महतीशोकदावेस्फोटक ४६ देवास्फुरणांनिर्जेताघातितःकेनसांप्रतं एवंविलप्यबहुलंशोकव्याकुलमानसा
४७ पपातधरणीपृष्ठेवज्राहतइवाचलः गतामूर्छांमुहूर्तेनमनस्येवंविचारयन् ४८ येनमेनिहतस्तात तंहनिष्यामि
सांप्रतं करेगृहीत्वातच्छीर्षंययावन्वेषतीसती ४९ पितरंचपतिंभ्रातॄन्गतासूनवलोकयन् तेषामग्रेहरिंदृष्ट्वादेवना-
परिवारितं ५० गंधर्वैस्तूयमानंचशक्राद्यैश्चनमस्कृतं एवमानंदमग्नंदृष्ट्वानादंचकारह ५१ तेननादेनसंत्रस्ताःशक्रा
द्यादेवतागणाः पेलुर्दशदिशोभीतानकेचिदवशेषिताः ५२ हरिमेकाकिनंज्ञात्वारूपंदध्रेसुविस्तृतं हरिंभक्षितुमुद्युक्ता
यावत्साभिमुखंययौ ५३ हरिःकौमोदकीतावत्क्षिप्तवांस्तन्मुखेरोधने आगतांतद्गदांज्ञात्वामुखेसाजगृहेरयात् ५४
मुखेगृहीतापिगदावेगाद्दिव्यानराधिप निनायपृष्ठतोवेगाच्छतयोजनमायतं ५५ पुनर्ययौहोलिकापिगृहीत्वाताल
पादपं चिक्षेपवेगात्तंरक्षंविष्णुमूर्धनिकोपतः ५६ तावच्चक्रेणवैच्छित्वापातयामासभूतले पुनःसाजगृहेस्थूलानुपला
न्गिरिसंभवान् ५७ ववर्षभगवन्मूर्धिगिरिशृंगेयथाघनः न्यवारयच्चक्रेणभगवान्जगदीश्वरः ५८ एवंसमभवद्यु-
द्धंदिव्यवर्षसहस्रकं हरिहोलिकयोस्तत्रत्यद्भुतंनृपसत्तम ५९ त्रस्तास्तेखेचरास्तत्रपेलुःसर्वेदिशोदश अद्भुतंहिमहद्यु
द्धंवरदानप्रभावतः ६० इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येषड्विंशोध्यायः २६ ७ नारदउवाच एवंबहूनि
थंकालंकृतयुद्धतयासह चक्रप्रहाराभिहतापातयामासभूतले १ तदास्मरंस्मरंहोलात्यात्मनःकुलदेवतं बिभ्रतं
धवलशांतमक्षमालाधरंविभुम् २ भोःसांबशिवशर्वेतिउच्चैःशब्दंप्रकुर्वति तदाकर्ण्यहरिःसोपिकरुणापूर्णमानसः

३ यथातयास्मृतश्चित्तेतद्गतोभूच्छिवःस्वयं शिवस्यहृदयंविष्णुर्विष्णोश्चहृदयंशिवः ४ नयोर्नभेदःकिंचिद्वैभेदबु
द्धिर्विनश्यति श्रीभगवानुवाच नेत्रेउन्मीलयाशुत्वंयभद्रेस्मरसिचेद्वं ५ स्वयंशिवोहंवैसाक्षाद्रागतस्तवचिंतना
नू एवंतद्गिरमाकर्ण्यहोलिकाविस्मयंगता ६ उन्मील्यनेत्रेसहसापश्यतिस्माशिवंस्वयं उत्थानुनैवशक्तासाप्रणनाम-
मुहुर्मुहुः ७ उवाचकरुणंदीनाहोलिकादीनवत्सलं नाथनाथकृपासिंधोत्राहिमांशरणागतां ८ मामुद्धरविरूपाक्षकृ
पानाथविभूषण एवंस्तुत्वातुतंशर्वंतूष्णीमासचहोलिका ९ नारदउवाच चक्रेणछिन्नगात्रांतांहस्ताभ्यांभक्तवत्सलः
अंकमारोप्यवेगेनमार्जयामाससन्मुखं १० उवाचकरुणासिंधुर्होलिकांदीनवत्सलः शिवउवाच वरंवाच्यभद्रंतेहोलि
केहोलकन्यके ११ तपसाचरितेनैवविक्रमेणतवापिच तुष्टोहंनवदास्यामियद्यभिलषितंध्रुवम् १२ होलिकोवाच
यदितुष्टोसिदेवेशजगदीशजगत्पते मयापूर्वंतुयत्सर्वंकृतंकर्मसुदुष्करं १३ व्यभिचारात्मकंसर्वंतेनाप्याचरितेनवै त
दाप्रभृतिलोकेस्मिन्वाममार्गस्यभूषणं १४ कुर्वंतियेनरालोकेस्थिरामातेषुसर्वदा भर्त्राकृतेनचैवास्तुमुक्तिरस्तुमम-
प्रभो १५ श्रीशिवउवाच यथामनसिकल्याणीवर्ततेनत्तथास्तुवै भविष्यतिनसंदेहोममवाक्येनसर्वथा १६ नार
दउवाच एवंलब्ध्वावरंतस्मात्त्याजराक्षसींतनुं देवतारूपमास्थायशिवसान्निध्यमभ्यगात् १७ तस्याःकलेवरंशभु-
क्षिप्तवान्वैहुताशने तद्भस्मस्वेषुगात्रेषुलेपंकृत्वापरेहनि १८ पूर्णमास्यांफाल्गुनस्यप्रदोषेभगवान्हरः ददाहहोलिका-
देहंशुभाभिनरपुंगव १९ तदाप्रभृतिलोकेस्मिन्होलिकाव्रतमुत्तमम् आविर्भूतंनरश्रेष्ठविश्वस्यसुखदायकं २० मुन
यऊचुः साधुसाधुमहाभागहोलिकायाव्रतंशुभम् उक्तंचतद्विधिंब्रूहिकृपांकृत्वाजगद्धितं २१ सूतउवाच माघ
स्यपौर्णमास्यांतुयावत्फाल्गुनपौर्णिमा तदाग्रामाधिपतिनाप्रीतयित्वाजनैःसमं २२ शुभानाचैवदारूणाकार्यचोर्यंनिशा
सुच व्यभिचारोपिकर्तव्योहोलिकाप्रीतयेतदा २३ करपृष्ठोद्भवताभगस्मरणपूर्वका मासेमुहुःप्रकर्तव्यागर्जनाहो

लिकामुद्दे २४ एवंकृत्वापौर्णमास्यांप्रदोषेनरपुंगव पुराद्बहिर्नृपतिनापौराश्चस्वगृहाद्बहिः २५ संमार्जनंकारयित्वालेपनं-
चततःपरं स्वस्तिकानिविचित्राणिकृत्वापौरैर्नरस्तनः २६ शुभाभिरभितश्चाथदारुभिश्चोरकर्मणा तस्योपरिचितांकृत्वा
वर्तुलांसुमनोहरां २७ आज्ञाधिपतिनाकार्यापुरद्वारमितानृप गृहाधिपतिनाकार्यागृहद्वारप्रमाणिका २८ शक्त्यभावेस्व
पानाचतदर्धार्धाभिरंकितः शक्तौशाठ्यंनकर्तव्यमन्यथाह्यनभुग्भयं २९ तस्मात्सर्वप्रयत्नेनहोलिकांरचयेच्छुभां हो-
लिकाप्रतिमांकृत्वास्वर्णंवाराजतींतथा ३० तस्याश्चभेतान्नमयींविचित्रशाठ्यंनकारयेत् पूजयेत्प्रतिमांतत्रचितायांनिक्षि
पेत्ततः ३१ एरंडैरिक्षुदंडैश्चकारयेद्दूषितांनृप प्रत्यब्दंपूर्णिमास्यांतुनपस्येकारयेत्सुधीः ३२ इतिश्रीभविष्यपुरा-
णेतपस्यमाहात्म्येसप्तविंशोऽध्यायः २७ ९ पृथुरुवाच पूजनंकेनमंत्रेणकर्तव्यमुनिपुंगव तत्सर्वंमम्ब्रूयाच्च
क्ष्वकृपांकृत्वाजनोपरि १ नारदउवाच स्नानंकृत्वानदीतीरेहोलिकासन्निधिंव्रजेत् उपविश्यासनेविद्वान्देशका
लौनुसंस्मरेत् २ आत्मनःसर्वकामार्थसिद्धयेश्रीविष्णुद्वये अग्निबाधानिरासार्थंहोलिकाप्रीतयेतथा ३ वार्षिक्यं
पूजनंकुर्वेयथावैगोमयाचले तेनमेहोलिकादेवीप्रीयतांशुभदायिनी ४ सप्तहस्तांचतुःशृंगासप्तजिह्वांद्विशीर्षका
त्रिपदांह्रस्वदनांरुक्षवासीनांशुचिस्मितां ५ मेषारूढांजटाबद्धांजिह्वालेलनभीषणां तप्तकांचनसंकाशांहोलि
कांत्वदिचिंतये ६ ध्यानं आगच्छदेविकल्याणीवृषारूढेजगन्मये यावत्पूजासमाप्येनतावत्वंसन्निधौभव ७
आवाहनं आसनंहोमसंयुक्तंस्थापितंतेपुरःशुभम् स्वीकुरुष्वमहाकालीहुताशनिनमोस्तुते ८ आसनं अग्नि
रूपधरेनुभ्यंनमस्तेविश्वरूपिणी होलिकेदेविकल्याणीपाद्यंगृण्हनमोस्तुते ९ पाद्यं अर्घ्यतापुष्पसंयुक्तंपूगीफ
लसमन्वितं अर्घ्यंगृहाणदेवेशीहुताशनिनमोस्तुते १० अर्घ्यं कमंडलुस्थनाम्नंचशीतलोदकपूरितं आचम्य
देवदेवेशिप्रीत्यर्थंप्रनिगृह्यतां ११ आचमनीयं पंचामृतंमयानीतं० पंचामृतस्नानं० गंगासरस्वतीरुष्णारेवाता

पीपयोष्णिकाः ताभ्यःस्नानार्थमानीतंगृहाणविमलंजलं १२ स्नानं प्रसीददेवदेवेशिप्रसीदकरुणानिधे नमस्तेभ्र
ह्मरूपिण्येवस्त्रयुग्मंगृहाणभोः १३ वस्त्रं० हरिद्राकुंकुमंचैव० हरिद्राकुंकुमं० श्रीखंडचंदनंदिव्यं० चंदनं० अक्षतां
श्चसुरश्रेष्ठ० अक्षतान् मल्लिकाशतपत्राणिजातीपुष्पाणिचैवहि पंचकबिल्वसयुक्तंपुष्पंगृण्हनमोस्तुते १४ पुष्पं० वन
स्पतिरसोद्भूतो० धूपं० साज्यंचवर्ति० दीपं० अपूपंघृतसंयुक्तंनानाभक्ष्यसमन्वितं नैवेद्यंतेमयादत्तंगृहाणपरमेश्वरि
१५ नैवेद्यं० इदंफलंमया० फलं० पूगीफलंमह० पूगीफलं० हिरण्यगर्भ० दक्षिणां० नीराजनदीप नमस्तेदेधिकल्या
णिनमस्तेकरुणानिधे नमस्तेहोलिकेदेविरुद्रस्यापियवादिनी १६ मंत्रपुष्पं० होलिकेहोलतनयेपूजांस्वीकुरुमेशु
भे स्वस्थानंगच्छभवतिरक्षमामभिजाद्भयात् १७ गुडोद्भवान्यश्चिकांश्चगृहाणपरमेश्वरी यश्चिकोत्थानमेबाधाभव-
तुत्वत्प्रसादतः १८ पश्चात्प्रदक्षिणांकुर्यात्होलिकायैसमंततः करपृष्ठोष्ठसंयुक्तोभगस्मरणपूर्वकः १९ उच्चैर्नादःप्र-
कर्तव्यःस्वस्वशक्त्यनुसारतः होलिकाप्रीतयेतत्रविप्राणांपूजनंस्मृत २० भूयसींदक्षिणांदद्याद्विप्राणांभोजनंतथा
भोजनंतुरुक्षवासिन्यैहरिद्राकुंकुमंतथा २१ एवंपूजाविधिःप्रोक्तोदुःखाशिन्यानरोत्तम एवंकृतेनभवतिनराणामभिजंभ
यम् २२ बहुसौख्यमवाप्नोतिशिवसायुज्यमाप्नुयात् तत्रजागरणंकार्यंसर्वैर्नागरिकैःसमं २३ महान्कोलाहलःक
र्योभगःस्मरणपूर्वकः २४ इतिश्रीभविष्यपुराणेतपस्यमा० अष्टाविंशोऽध्यायः २८ ७ नारदउवाच एवं
कृत्वापौर्णमास्यांविधिंराजन्प्रयत्नतः प्रातःस्नानंतुविधिवत्कृत्वाचोत्तरपूजनं १ कारयेद्विधिवत्तस्यततोभस्माभि-
मंत्रणं होतिकेत्वंमहामायेवाममार्गप्रदेशिवे २ तवांगभस्मसंस्पर्शात्पापंगच्छतुमेसदा एवंप्रार्थ्यमनसाभ्यष्टांगेवि-
नियोजयेत् ३ पुनर्भस्मगृहीत्वावैपादांगुष्ठाच्छिरःप्रति लेपयेत्तुप्रयत्नेनसर्वरोगोपशांतये ४ भूतिंहस्तमितेवस्त्रेजीर्णेव
शयुतांवहेत् तस्मिन्ग्रंथिंदृढंकृत्वामणिबंधंतुबध्नियात् ५ ग्रामनाथपुरस्कृत्यवाद्यघोषसमन्वितं प्रतिगेहंततोगच्छेन्न

त्रस्थान्बालकान्मुदा ६ चतुष्पथंसमानीयस्फुरद्दुंदुभिवादनं जयघंत्रैर्वैणवैश्चृतथाचर्मोद्भवैरपि ७ परस्परंततोभस्मनिक्षि
पेन्मस्तकोपरि जलयंत्रैस्तथासिंचेद्धीतहास्यविनोदतः ८ मार्गेदृष्टान्जनान्कार्यसत्कानानीययत्नतः तेषामुपरिभस्माबुनि-
क्षिपेद्धास्यपूर्वकं ९ एवंसर्वजनैःसार्द्धंग्रामनाथःसमाचरेत् ततोगच्छेत्पुरद्वारेनानाकौतूहलान्वितः १० परस्परंततोयुद्ध्ला
पयेद्बुद्धिपूर्वकम् ततोमध्यान्हसमयेजलक्रीडांसमारभेत् ११ ततोमाध्यान्हिकंकुर्याद्गोपीगीतंपठेत्ततः गोविंदोगोपिना
थश्चगोपालोगोधनप्रियः १२ गोचारिपदद्यानाचगोवर्द्धनधरोहरिः गोपीचंदनलिप्तांगोभक्तसंसिद्धिदायकः १३ गीतापाठर
तानंददायकोगोधनप्रियः द्वादशैतानिनामानियःपठेच्छृणुयादपि १४ तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदः भवंत्येव-
नसंदेहोयःपठेत्सततंनरः १५ विद्याकामोभवेद्विद्वान्धनार्थीधनमाप्नुयात् पुत्रार्थीलभतेपुत्रयशोर्थीलभतेयशः १६
कन्यार्थीचाप्नुयात्कन्यांद्वारार्थीचाप्नुयाद्स्त्रियं सहस्रावर्तनान्मर्त्योलभतेवांछितंफलम् १७ लिखित्वापुस्तकंचास्य
पूजयेद्योनिरंतरं नाग्निचोरभयंतत्रविष्णुभक्तिस्थिराभवेत् १८ अयुतावर्तनान्मर्त्योराजानंवशमानयेत् भूर्जपत्रेलिखित्वे
दंत्यष्टगंधैरविघ्नहे १९ भूतप्रेतपिशाचादिबाधातत्रनजायते बहुनात्रकिमुक्तेनभुक्तिंमुक्तिंसविंदति २० एवंस्तोत्रंपठि
त्वातुपुनःस्नानंसमाचरेत् ततोमाध्यान्हिकंकृत्वास्वस्ववेश्मनिचव्रजेत् २१ देवतापूजनंकृत्वाभोजनंद्विजसाक्षिकं कद
न्नंनैवभक्षेत्ननस्तांबूलंचवर्णं २२ एवंहिफाल्गुनेमासिद्वितीयदिवसेव्रतं नकरोतिनरोमूढोरौरवंनरकंव्रजेत् २३ तस्मिन्
दिनेनगंतव्यंकेनापिकुत्रचित्वचित् यदिगच्छंतिचेन्मर्त्योमृत्युमाप्नोतिनिश्चितं २४ नारदोक्तमितिश्रुत्वाराजावचनमब्रवीत्
वदमेकुपयाब्रह्मन्कोमृतस्तद्दिनेगतः २५ एनंमेसंशयंछिंधिसर्वज्ञोसिमहामते नारदउवाच आसीद्बंगालविषयेनगरं
दुर्मदाभिधं २६ तस्मिन्राजाशूरसेनःप्रजापालनतत्परः दानशूरोवदान्यश्चशत्रुसंहारकारकः २७ तस्यपत्नीसुशीले
निरूपौदार्यगुणान्विता तस्यपुत्रोमंदबुद्धिर्विरूपइतिविश्रुतः २८ प्रधानास्तस्यचत्वारोनीतिशास्त्रविशारदाः एवंराजाब-

३०

हृदिनंतैर्युक्तः पालयन्प्रजाः २९ तस्मिन्शासतिभूचक्रेजनोनंदयुतोभवन् पूर्णिमायांपूजयित्वाहोलिकामपरेहनि गृहाद्बहिर्निर्गतस्तुविरूपोनिधनंगतः ३० इतिश्रीभविष्यपुराणेतपत्यमाहात्म्येएकोनत्रिंशोध्यायः २९ ॥
पृथुरुवाच किमर्थंकस्यदाहेनोःकार्यायकुत्रवागतः विरूपोपिकुतोब्रह्मन्निषिद्धदिवसेगतः १ नारदउवाच
अहंतेकथयिष्यामिविरूपस्यकथानकं शृणुष्वावहितोराजन्हितायजगतोपिच २ शूरसेनस्यवैराज्ञःकदाचिच्छ
त्रवोभवन् आंध्रकर्नाटसौराष्ट्रराजानोमिलितायुः ३ तानागतान्समाकर्ण्यविरूपस्तुसमादिशत् गणका-
स्तुसमाहूयस्तुमुहूर्तंविचारयन् ४ नृपस्यासिनपक्षेतुनंदायामविलंबितम् ऊचुस्तेगणकाराजन्नाद्यैवराज
सत्तम ५ विजयोभवितानूनंनात्रकार्याविचारणा तच्चैकोगणकोधीमान्राजानंवाक्यमब्रवीत् ६ अयंमुहूर्तो-
भोराजन्ननैर्दत्तोमयानहि यदिस्वकल्याणमिच्छुर्तर्हिमेवचनंशृणु ७ पुरानुजान्हवीतीरेराजासीद्बालवांमिधः त
स्यदुर्व्यसनंचासीन्मृगयायांनराधिप ८ कदाचिद्दैवयोगेनराजादुर्घटकर्मणा तपस्यासिनपक्षेतुनंदायांमृगयागं
तः ९ बहुसैन्यसमायुक्तोमृगयोपस्करैर्वृतः ग्रामसिंहैःसमायुक्तोत्यग्निशस्त्रधरैस्तथा १० चतुरंगचमूमध्येशु
शुभेसमहीपतिः वनंप्रविश्यगहनंमृगान्हत्वात्यनेकशः ११ नरक्षून्गवयान्व्याघ्रान्रुरून्सिंहाननेकशः हतान्
हतान्मृगान्राजास्वग्रामेप्रेषयत्तदा १२ अष्टापदंनाममृगंमृत्युदूतमिवस्थितं निकटेदृष्टवान्राजानंहंतुंसमनोद
धे १३ अष्टापदस्तराजानंतरसाहतवान्बली अष्टापदहतंभूपंदृष्ट्वातेसैनिकाः क्षणात् १४ पलायनपराजाता
श्चतुरंगबलंमहत् दशदिक्षुननोराजन्भयभीतमभूत्तदा १५ ततोऽमात्याः सर्वसैन्यमिलित्वानगरंययुः वृत्तांतंरा
ज्ञेपुत्राय कथयामासुरंजसा १६ पितुर्क्रियांततःश्वक्रेराजपुत्रोनिभक्तितः शोकंकृत्वाराजपत्नीपतिनास्वर्गतिंय-
यौ १७ वृद्धगणकउवाच एतस्मात्कारणाद्राजन्नगंतव्यंकदाचन इतिद्विजस्यवचनंश्रुत्वासंशयमागतः १८

पुत्रमाहूयनद्वाक्यंश्रावयामाससादरं दुराग्रहीविरूपोसौनिर्भर्त्स्यद्विजपुंगवम् १९ सर्वभूदास्त्वमेकोसिसक्रुद्धःकिंवदसेखल अतःपरमावदत्वंगच्छस्वभवनंप्रति २० विप्रावमानिनंपुत्रंराजावचनमब्रवीत् तोविरूपंनगच्छस्वहंतुंशत्रुममाज्ञया २१ द्विजनिर्भर्त्सनामेवंमाकुरुष्वकथंचन गतश्रीर्गणकान्दृष्टिगतायुश्चचिकित्सकान् २२ गतश्रीश्चगतायुश्चब्राह्मणान्दृष्टिपुत्रक पितुर्वचनमाकर्ण्यविरूपोत्थवदत्तदा २३ अहमद्यैवगच्छामिकृत्वाशत्रुवधंपुनः आगमिष्यामिराजेंद्रपश्यमेपौरुषंमहत् २४ ततोत्थेनंद्विजंराष्ट्राद्बहिर्निष्काशयाम्यहम् एवंप्रवादिनंपुत्रंराजावचनमब्रवीत् २५ ब्राह्मणस्यावमानात्तेजयोनैवभविष्यति एवब्रुवंतंराजानंविरूपोत्थवदत्तदा २६ नवापिबुद्धिनाशोस्तिवयसोतिक्रमान्नृप अहंत्यद्यैवगच्छामिशत्रूंस्तंनसंशयः २७ विरूपस्यवचःश्रुत्वातूष्णीमासनृपस्तदा सज्यसैन्योमहावीरान्निर्महीतुरणंययौ २८ कृत्वानुत्तुमुलंपश्चात्पंचत्वमगमत्ततः एतस्मात्कारणाद्राजन्सावर्ज्यास्सर्वजंतुभिः २९ इतिश्रीभविष्यपुराणफाल्गुनमाहात्म्येत्रिंशोऽध्यायः ३० ॐ पृथुरुवाच पुनस्त्वंवदविप्रेंद्रतपस्योपव्रतानिच तपस्यासिनपस्येयानंदानामापिकीर्तय १ नारदउवाच वदामितवराजेंद्रसर्वमेतद्शेषतः फाल्गुनस्यासितेपक्षेप्रतिपत्करिसंयुता २ पानादिदोषादधिकागमनेवर्जयेत्सदा ३ तपस्यासितपक्षेतुकार्यंहिव्रतपचकम् धूलिव्रतंतुकथितंपूर्वमेवनराधिप ४ तस्याकरणदोषास्तुकथ्यतेवैमयाधुना विभूतिलेपनाभावात्कुष्ठरोगोभिजायते ५ पुनर्जन्मनिराजेंद्रगार्दभीयोनिमाविशत् एतदर्थंमहाराजकथांपौराणिकींशृणु ६ रेवातीरेपुराकश्चिद्धनिकोवैश्यवर्णजः सुदर्शनोनामराजन्सर्वविद्याविशारदः ७ पंचयज्ञरतोनित्यंदेवतातिथिपूजकः अध्यात्मविद्यानिरतःसर्वव्रतपरायणः ८ तेनज्ञानमदांधेनतपस्येमासिसत्व्रत पूर्णिमांप्राप्यराजेंद्रहोलिकापूजनंनृप ९ नकृतंचोपहासोक्त्याधूलिकाव्रतपंचकं करपृष्टोष्टसंयोगध्वनिर्नैवकृतस्तथा १० रात्रौजागरणंचापिनकृतंमंदबुद्धिना ते

नास्यसकलंवित्तंगृहदारादिकंतथा ११ नष्टंतुहोलिकाक्षोमात्परंदारिद्र्यमाप्तवान् ततादुःखवशाद्वैश्योगृहंत्यक्त्वा
वनंगतः १२ वनाद्वनांतरंगच्छन्मुनेराश्रममाविशत् गालवस्यतुराजेंद्रपर्णकुट्यांसमाविशत् १३ पादौगृहीत्वसमु
नेर्दंडवत्प्रणनामसः ध्यानंविसृज्यसमुनिःपुरतस्तमपश्यत १४ पृष्टवान्समुनिःपश्चात्कोभवान्कुतआगतः
एवंपृष्टस्तुमुनिनावैश्योवचनमब्रवीत् १५ माहिष्मतीनामपुरीरेवातीरेऽभूषिता तत्रस्थोहंधनीवैश्यःस्कंदशर्मइति
स्मृतः १६ कदाचिद्दैवयोगेननष्टंबहुधनंमम सदाचाररतोनित्यंसत्यधर्मपरायणः १७ सर्वव्रतकस्याहंब्रह्मविद्याक
रस्तथा इदानींकेनदोषेणदारिद्र्यमुपागतं १८ देहेकुष्ठसमुत्पत्तिर्जातामेमुनिसत्तम कुत्रापिनलभेशर्ममनसो
भ्रमएवच १९ जानन्नदानींतुममउपायाबहवःकृताः कुष्ठादिरोगनाशार्थंतथादारिद्र्यशांतये २० उपायानिष्फला-
विप्रजातामेदैवयोगतः तदामयागृहंत्यक्तमरण्यंसमुपागतः २१ दारिद्र्यरोगभीत्यातुमरणंचिंतयाम्यहं व्याघ्रादि
हिंसकाःसर्वेमानहिंसंतिभोमुने २२ इदानींत्वत्सकाशेहंप्राप्तोस्मिकरुणांबुधे अत्रापिमहदाश्चर्यंमयादृष्टंतवाश्रमे
२३ सिंहव्याघ्राश्चनरसागजागावःसरीसृपाः बिडालानकुलाश्चैवमूषकामंडुकास्तथा २४ क्रीडंतित्यक्तवैराश्चघोर-
साबाधवोयथा प्रमोदगमिताःसर्वेत्यहंदुःखीतवाग्रतः २५ एतस्यकारणंब्रह्मन्कृपयाचवदाधुना एवंवैश्यवचःश्रुत्वा
ध्यानस्तिमितलोचनः २६ गालवोविस्मयाविष्टोवैश्यंवचनमब्रवीत् त्वयाज्ञानमदांधेनतपस्येव्रतपंचकम् २७ नकृतं
हेलयातेनदारिद्र्यंपतितंत्वयि कुष्ठादिरोगसंभूतिर्दंडेजातातवाधुना २८ एवमुक्त्वागालवस्तूष्णींमासनृपोत्तम
२९ इतिश्रीभविष्यपुराणेफाल्गुनमाहात्म्येएकत्रिंशोऽध्यायः ३१ ५ नारदउवाच श्रुत्वानुवाक्यंमुनि
पुंगवस्यस्कंदशर्मानीवस्मयान्वितोभूत् पप्रच्छदारिद्र्यविनाशकृत्परंभूयोमुनिंक्लेशविनाशहेतवे १ स्कंदशर्मउ
वाच महाराज ऋषिश्रेष्ठसर्वकल्याणसाधक दारिद्र्यरोगनाशार्थंहोलिकाक्षोभशांतये २ ब्रूहिमेपरमेशान

त्युपायंक्लेशनाशनं कथितवान् वैश्यनंमेपुत्रोदेहशुद्ध्यर्थमेवच ३ सर्वपापविनाशायप्रायश्चित्तंपृहाण
भोः भूयोनम्रनिपत्यांघ्रीपितृपेणहरयते ४ यथादारिद्र्यदुःखंगहरयतेयत्तत्तथा रुद्रानउवाच प्रायश्चि-
त्तंदिशमुनेदेहशुद्ध्यर्थमेवच ५ कृतेनयेनदारिद्र्यंलयंकृष्णदोव्रजेत् गालवउवाच अनुतापसमायुक्तः पू
र्वंभूयोलतःपरम् ६ वेदशास्त्रसमायुक्तानुकामलोभविवर्जितान् निर्मत्सरान्द्विजान्दृष्ट्वान्द्विष्णुभक्तिपुरस्कृ-
तान् ७ महाभागवतान्शांतान्विष्णुमुद्राकितांस्तथा दृष्ट्वाचार्यान्वैश्यपतीविचारयवदानेत ८ वैश्यउवा
च वैष्णवानांलक्षणंमेकथयस्वमुनेधुना तानहंशरणंगच्छेत्प्रायश्चित्तार्थमेवच ९ गालवउवाच विष्णुस्मृतिं
येसततंपठंतिहरेर्गुणान्कर्णपुटैःपिबंति करैस्तुलसीदलैर्यैकुर्वंतिपूजांसततंहिविष्णोः १० रुद्रानउवा
च ब्रूहिमेभगवन्विष्णोःस्तुतिंपापहरांपराम् गालवउवाच ॐनमोभगवतेतुभ्यंविष्णवेप्रभविष्णवे अ-
हंत्वांशरणंयामिपापंमेनुदसर्वदा ज्ञानंप्रदायमोक्षादिदात्रेतुभ्यंनमोनमः ११ भूयान्मनःकृष्णपदारविंदयोरुक्त
तींदिव्यकथानुवर्णने नेत्रेममास्तांप्रतिमेक्षणेसदाश्रोत्रेकथायांतुपदेसुतीर्थे १३ घ्राणंतुतत्पादसरोजसौरभेनकृष्ण
गंधादिविलेपनत्वक् स्यात्तांचहस्तौनवमंदिरेविभोसंमार्जनादौममनित्यदेव १४ वाणीतवाद्भुतकथागणरंजितास्या
न्मूर्धात्वमे स्यात्तववंदनेऽनिशं कामश्चमेस्यात्तवसत्कथायांबुद्धिश्चमेस्यात्तववेदनेऽनिशं १५ दिनानिमेस्युस्त
वसत्कथोदयैरुद्गीयमानैर्मुनिभिर्गृहागतैः हीनप्रसंगस्तुनमेभवेत्क्षणंकदानिमेषार्धमथापिविष्णो १६ नपारमे-
ष्ठ्यंनचसार्वभौमंनचापवर्गंस्पृहयामिविष्णो त्वत्पादसेवांत्वसदैवकामयेप्रार्थ्यांश्रियाब्रह्मभवादिभिःसुरैः १७
हेकृष्णविष्णोमधुकैटभारेब्रह्मादिभिर्वंदितवंदनीय संसारकूपेपतितंस्करेशकरावलंबंजगदीशदेहि १८ सस
रसर्पदष्टंमांविषयौघविषार्दितं विषान्मोचयमांनाथसंजीवयकृपांबुधे १९ गुणाधीशगुणातीनगुणत्रयवि

वर्जित भवपोनरूपापूरगुणभावननेनमः २० निर्मायनिरहंकारभक्तानांमुक्तिदायक शेषशायिन्रमानाथनवा-
हंशरणंगतः २१ उपेंद्रमत्स्यकूर्मादिष्ववतारप्रवर्तक स्वमायानिर्जितजननवाहशरणं गतः २२ प्रह्लादभक्तवच
नात्स्तंभाविर्भूतभूनिद हिरण्यकशिपोर्हंतस्तवाहशरणागतः २३ पापोहंपापकर्माहंपापात्मापापसंभवः त्राहि-
मांपापशमनतवाहशरणंगतः २४ ममापराधोनास्त्येवतवाहमिनिवादिनः शरणागतसंत्यागात्पापंतवभविष्यति
२५ त्वदिस्थितोसिसर्वेषांबुद्धिदानात्मेवच सद्बुद्धिंदेहिमविष्णोपापद्रुमकुठारक २६ पापदावाग्निमध्येहं प-
तितोस्मिजनार्दन पाहिमांकरुणासिंधोदासानांहिनकारक २७ अनेकजन्मनिमयायत्कृतं दुरितंविभो तत्वनाशा
यदेवेशशरणंतेगतोस्म्यहम् २८ एवंस्तुवंनियेनित्यंविद्धिनान्वैष्णवान्शुभान् अंतर्निष्ठारतान्विद्धीतरेदांभि
काःस्मृताः २९ नारदउवाच येपठंतिस्तवंनित्यंवैष्णवावैष्णवाश्चापि उभयोश्चोभयंप्राप्यंरहिकामुष्मिकंसु
खम् ३० सकामोलभतेभोगान्निष्कामोमोक्षमाप्नुयात् शैवाःसौराश्चगाणेशाः शाक्ताश्चापिनराधिप ३१ आतो
जिज्ञासवोभक्ताज्ञानिनोत्यर्थकामुकाः चतुर्विधाःस्वकीयानिफलानिविविधानिच ३२ लभंतेनात्रराजेंद्रभक्तियु
क्तानसंशयः तस्माद्भक्तिंपरांविद्धिपुमर्थपरिसाधने ३३ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येहानिशोऽध्या
यः ३२ ॥ नारदउवाच स्कंदर्शनंगालवस्कंपुनःप्रोवाचभूपते गच्छत्वंवैष्णवान्वैश्यप्रायश्चित्तविधिंकुरु
१ तेनकृत्वादेहशुद्धिंकुरुष्वव्रतपंचकं ममावकाशोनास्त्यत्रतपश्चर्यांतरादिह २ श्रुत्वागालवावाक्यंतुवैश्योगाद्वै-
ष्णवान्प्रति तेभ्यःस्वकीयाचरणंश्रावयित्वास्कदर्शनः ३ शुद्ध्यर्थंप्रार्थयत्तेहिभूपुस्तंनिष्कृतिंपरां विप्राज्ञयातदा-
चक्रेप्रायश्चित्तविधिंतथा ४ तपस्यपंचकंचापिगतोदाक्ष्यंकुष्ठकौ इहभुक्त्वाखिलान्भोगान्पुत्रपौत्रसमन्वितः
५ कीर्तिंचविपुलांप्राप्यविष्णोःसायुज्यतांगतः नारदउवाच अयंतेकथितोराजन्निहासःपुरातनः ६ एनंसंकीर्त

येन्नित्यंशृणुयाद्वासमाहितः दारिद्र्यकुष्टरोगादिनाशोभवतितल्लक्षणात् ७ एतस्मात्कारणाद्राजन्सर्वैजनपद्यनादिकं
कार्यमात्महितंयद्व्रतपस्यव्रतपंचकम् ८ पृथुरुवाच सर्वव्रतेभ्यस्तपसस्तपस्येपंचकंहितं यत्वयोक्तद्विजश्रेष्ठतन्मवि
स्तारतोवद ९ नारदउवाच फाल्गुनेपौर्णमास्यांतुकार्यमग्निव्रतंद्विजैः विधिंतस्यप्रवक्ष्यामिशृणुष्वावहितोनृप १० अ
ग्निमूर्तिंपुराध्यायेन्नाम्नातुवरदाशुभाम् नामूर्तिंहोलिकादेविद्वारदेशेक्षिपेत्ततः ११ उपचारैःषोडशभिःपूजयित्वा
व्रतीपुनः तिष्ठेद्यावच्चार्धदेहोहोलिकायास्तुप्रज्वलेत् १२ प्रदक्षिणात्रयंकृत्वापरिवारयुतस्तथा करपृष्ठोष्टजनिता
न्शब्दानुच्चांस्तुकारयेत् १३ रात्रौजागरणंकुर्याद्भगोच्चारणगायनैः एवमग्निव्रतंकार्यमादित्यस्योदयावधि १४ शूद्रैस्त
थावर्णावरैर्द्यैः कार्यमग्निव्रतंनृप ततःकार्यंप्रयत्नेनद्वितीयदिवसेजनैः १५ भस्मव्रतंभूतिकरंविधिंतुप्रवदामिते सू
र्योदयेसमुत्थायप्रणमेच्चदिवाकरं १६ होलिकायाग्नितादेशमागत्यजलकुंभकैः दुग्धकुंभैस्तथाराजन्भस्मधूलिंतु
सेचयेत् १७ तद्भस्मसर्वगात्रेषुलेपयेन्मंत्रपूर्वकं होलिकादेहसंभूतसर्वभूतविनाशन १८ मदीयदेहजान्रोगान्भ
स्मनाशयनाशय इतिमंत्रंसमुच्चार्यशिरसामारभ्यपादतः १९ एवंभस्मव्रतंकार्यंसर्वैरपिजनैःसदा तृतीयदिवसे-
राजन्धूलिकाव्रतमाचरेत् २० होलिकाभूमिसंभूतांधूलिंगृत्यस्वशक्तितः तयाचतुष्पथगतांखरैःखुरविदारिताम्
२१ प्रगृह्योत्साहसंयुक्तैरन्योन्यंशिरसिक्षिपेत् क्षुद्रदुंदुभिशब्दाश्चमुखशब्दास्तथैवच २२ एवंधूलिव्रतंराजन्च-
तुर्थेगोमयव्रतं विधिंतस्यप्रवक्ष्यामिमहिषीणांगवामपि २३ खरोष्ट्रगर्दभानांचपुरीषंगृह्यप्रयत्नतः अंगानिलेपये
त्तानुमुखशब्दपुरःसरं २४ एवंव्रतंगोमयस्यचत्वारिपंचमेहनि कर्दमस्यव्रतंकार्यंविधिंतस्यवदामिते २५ गोमूत्रो-
द्भवपंकंतुप्रगृह्यनृपसत्तम तथास्वमहिषीमूत्रखराजामूत्रसंयुतं २६ मृदंप्रगृह्यएतस्मिन्स्थानेऐक्यंतुकारयेत् तेन
सर्वैस्तुसर्वांगेलेपयेदुत्सवान्वितैः २७ करपृष्ठोष्टशब्दांश्चक्षुद्रदुंदुभिनिःस्वनान् भगोच्चारणपूर्वंतुकारयेद्धिपुनःपुनः

२८ एवंव्रतानांपंचानांविधिस्तेपरिकीर्तितः पंचाह्निकोयंयज्ञस्तेकथितोराजसत्तम २९ यज्ञेत्ववभृथस्नानंप्रोच्य
तेतेमयाधुना विधिंतस्यापिराजेंद्रविस्तरेणवदामिते ३० ग्रामाद्बहिः पूर्वदिशिदक्षिणेपश्चिमोत्तरे चतुर्णांतुदि
शांमध्येयादिकूसमतराभवेत् ३१ दिशिनस्यावापिकानुकारयेद्यथाविधि तस्यामवभृथस्नानकार्यसर्वजनैः
सदा ३२ व्रतपंचकसाफल्यंतेनसंजायतेनृप ३३ इतिश्रीभवि० फाल्गुनमा० त्रयस्त्रिंशोऽध्यायः ३३ ७
पृथुरुवाच यात्वयाकथितावापीकीदृशीसावदस्वमे नारदउवाच वाप्याःस्वरूपंवस्याम्यिश्रवणात्सापनाशन
१ अष्टास्त्राचनुरस्त्रावाषडस्त्रांवान्नृपोत्तम विस्तारतश्चतुर्हस्तांगभीरांतावतीमपि २ चर्मयंत्रोद्धृतजलैः पूरयि
त्वाप्रयत्नतः तन्मध्येनिक्षिपेन्मृत्स्नांनानास्थानगतांनृप ३ अश्वशालास्थितांचैवगजशालास्थितांतथा निक्षि
प्यतस्यांसतंपूजयेत्तांप्रयत्नतः ४ षोडशैरुपचारैस्तुग्रविशेद्विजपूर्वकं इमंमंत्रंसमुच्चार्यस्नानसंकल्पपूर्वकं
५ सर्वतीर्थोत्तमात्वह्स्फोटकादिभयापहे नपस्येनापसृजनेवंदितासिनमोस्तुते ६ करपृष्ठोष्टसंयुक्तान्भा
गस्मरणपूर्वकान् कारयेद्विधान्शब्दान्एवमाववभृथंचरेत् ७ कृतेत्ववभृथेराजन्पंचकंसफलंभवेत् अकृ
त्वावभृथस्नानंदेहेरोगसमुद्भवः ८ भवत्येवनृराजेंद्रकृतेतुव्रतपंचके अत्रतेकथयिष्यामि इतिहासंपुरातनम्
९ पुरात्वर्मण्वतीतीरेनगरंकंदराह्वयं तत्रासीद्ब्राह्मणःकश्चिस्सोमदत्तइतिश्रुतः १० धनवान्ज्ञानसंपन्नोवेद
शास्त्रार्थतत्ववित् भार्यारूपवतीतस्यचित्तज्ञातन्मनोहरा ११ सुशीलशीलनामानौह्यपुत्रौतस्यसुव्रतौ विद्वांसौतौ
वपिउभावेकचित्तौजनप्रियौ १२ कदाचित्फाल्गुनेमासिहोलिकायामहोत्सवं सर्वेजनाःप्रकुर्वंतोयथाविधिनृपो
त्तम १३ पुत्राभ्यांसोमदत्तेनहोलिकापंचकव्रतं यथाविधिकृतंराजन्तदानींदैवयोगतः १४ देहेज्वरसमुत्पत्तिःसो
मदत्तस्यचाभवत् ततोवभृथवेलायास्नानार्थंमीलिताजनाः १५ आगताःसोमदत्तस्यग्रहेतेव्रतिनोजनाः एहिए-

हीतिजल्पंतोभगोच्चारणपूर्वकं १६ करपृष्ठोष्ठसंयोगान्कुर्वंतोविविधान्रवान् तेषांकोलाहलंश्रुत्वासोमदत्तोज्वरान्वितः १७ तैसार्द्धंनोजगामाथज्वरितोस्मीतिचावदत् ततदावभृथस्नानंकर्तुंतत्पुत्रसंयुताः १८ गतास्तदातीर्थतटेमंत्रपूर्वंप्रचक्रमुः समाप्यावभृथस्नानंगतोमासस्तुफाल्गुनः १९ तन्मासाभ्यंतरेराजन्सोमदत्तोभगान्वितः रोमेरोमेस्फोटकाश्चसंजाताबहवस्तथा २० तस्योपशमनार्थायउपायाबहवःकृताः तथापिस्फोटशमनंनैवजातंनृपोत्तम २१ रोगोपशमनार्थायदेवताराधनंकृतं तथापिरोगनाशस्तुनैवजातःकथंचन २२ ततदात्रासंसमापन्नोगृहंत्यक्त्वावनंगतः वनाद्गतंरंगच्छन्वसिष्ठस्याश्रमंययौ २३ साष्टांगंप्रणनामाथतथैवपतितोत्थभूत् ध्यानंविसृज्यब्रह्मर्षिर्नेत्रेउन्मील्यदृष्टवान् २४ सोमदत्तमुवाचाथवसिष्ठःकरुणान्वितः किमर्थमागतस्त्वंहिदशामेतांकुतोगतः २५ एवंपृष्टोवसिष्ठेनसोमदत्तोब्रवीत्तदा ब्रह्मन्रोगाग्निभूतोहंत्वत्सकाशमिहागतः २६ इहजन्मनिपूर्वेवायत्कृतंदुष्कृतंमया तेनमेरोगसंप्राप्तिः संजाताबहुदुःखदा २७ नदुष्कृतंनजानामिनदर्थंमिहचागतः त्वंतुसर्वंविजानासिउपायंदुष्कृतं तथा २८ मह्यंकथयविप्रेंद्रपापरोगविनाशनं उपायमितिसंश्रुत्यवसिष्ठस्तिदमब्रवीत् २९ वसिष्ठउवाच जनैःसर्वैःप्रार्थितेनत्वयात्वज्ञानतःकृतः पंचकावभृथस्नानस्त्यागस्तेनेदृशीगतिः जातादृतवविप्रेंद्रतस्योपायमतःशृणु ३० इतिश्रीभ॰विष्णुपुराणेतपस्यमा॰चतुस्त्रिंशोऽध्यायः ३४ ७५ पृथुरुवाच कउपायोमुनेतेनकथितस्तुचमेवद नारदउवाच सोमदत्तंवसिष्ठस्तुप्रोवाचवचनंतदा १ फाल्गुनस्यासितेपक्षेचतुर्थ्यांगणनायकं पूजयस्वार्कपुष्पैश्चशमीदूर्वांकुरैस्तथा २ कृत्वामूर्तिंगणेशस्यस्वर्णंरौप्यमयींतथा अथवामृन्मयींकुर्याद्दित्तशाठ्यंनकारयेत् ३ उपचारैःषोडशभिः पूजयित्वागजाननं एकैकनाममंत्रेणात्युपचारान्समर्पयेत् ४ प्रथमंगणनाथायनामानिकथयाम्यहम् भक्तसंकटनाशायमहाविघ्नौघनाशिने ५ विघ्नराजायगजवक्त्रायतेनमः स्कमुरवोदुर्मुखश्चैव-

विकटोविघ्ननाशनः ६ ममोघसिद्धिरमृतोभक्तचिंताहरःकविः ब्रह्मांडमंडपस्तंभः शंडादंडविराजितः ७ ब्रह्माधि
ष्णुमहेशानामधिकारप्रदःशिवः योगिहृत्पद्मवासायतुभ्यंनित्यंनमोनमः ८ मोदकापूपलड्डुकैःपक्वान्नैर्विविधैरपि
पायसैःपंचखाद्यैश्चनैवेद्यंतुसमर्पयेत् ९ ततोदूर्वांकुरान्गृह्यएकविंशतिसंख्यया एकैकनाम्नाएकैकामस्तकेनुसमर्प-
येत्१० ज्ञानप्रदोज्ञानगम्योज्ञानदोज्ञाननाशकः ज्ञानदीपप्रकाशेनयोगिहृत्पद्मवासकृत् ११ ज्ञानामृतप्रदश्चैवभक्ता
नांभक्तिवर्धनः मुक्तानांमुक्तिदश्चैवसिद्धानांसिद्धिदःस्मृतः १२ साधकानांसाधकश्चरसज्ञानांरसप्रदः प्रत्यवायसमेता
नांप्रत्यवायहरस्तथा १३ दीनानांदैन्यहरणोबंधूनांमुक्तिदःस्मृतः चतुर्वेदविदाचार्यश्चतुर्वर्गफलप्रदः १४ पंचकावभृ
थस्नानस्यागिस्नानफलप्रदः ततोनीराजनंकुर्यान्मंत्रपुष्पंनिवेदयेत् १५ प्रदक्षिणानमस्कारान्कृत्वापूजांपुनःपठेत्
विविधानिचस्तोत्राणिमनुमेकाक्षरंजपेत्१६ एवंचतुर्थीव्रतकंएकविंशतिसंख्यया भक्त्यात्तयायानुकर्तव्यंकार्यसिद्धिर्भ
विष्यति १७ एतद्धिपरमंगोप्यंप्रीत्यातेकथितंमया त्वयातुयस्यकस्याविवक्तव्यंनकदाचन १८ भक्तिहीनायदुष्टाय्व-
चकायशठायच परदोषप्रवक्त्रेचनवक्तव्यंकदाचन १९ एवमुक्तोवसिष्ठेनसोमदत्तस्तदानृप प्रदक्षिणीकृत्यगुरुंप्राणि
पत्यगृह्ययौ २० पश्चाद्विघ्नार्थसिद्ध्यर्थंक्षेत्रंकिंक्षिप्रसिद्धिदं विचार्यसर्वक्षेत्राणिमृत्युलोकगतानिच २१ तेभ्योधिक
नरंक्षेत्रंमविमुक्तंययौतनः ढुंढिराजस्यनिकटेव्रतंचक्रेमुनीरितम् २२ ययोक्तंमुनिनातेनतुष्टोभूद्विघ्ननाशकः सोमदत्त
स्यपुरतःस्वरूपंप्रकटीकरोत् २३ चतुर्भुजंशूर्पकर्णंशंडादंडविराजितं कोटिसूर्यप्रतीकाशंकोटिचंद्रांशुनिर्मल २४
एवंविधतदारूपंदृष्ट्वासोविस्मयान्वितः तुष्टावपरयाभक्त्यागद्यपद्यैरनेकशः २५ बद्धांजलिःपुरस्तिष्ठन्भिदमुच्चैर्जगादह
व्रतत्यागीमदन्योनदुराचारीनथैवच २६ सापराधोपिशरणमिदानींतेसमागतः बहुनात्रकिमुक्तेनयदिच्छसितथाकुरु
२७ एवंस्तुतस्तदादेवः सोमदत्तेनधीमता वरंब्रूहिवरंब्रूहिवरंब्रूहीतिचाब्रवीत् २८ इतिदेवस्यवाक्यांतेसोमदत्तोब्रवीत्त

दा सर्वेषांत्वद्व्रतस्त्वंहित्वद्व्रतंवेत्सिचानघा २९ वरंब्रूहिकिमर्थंमांयांचयायोजयिष्यसि ततोदेवोऽब्रवीद्विप्रंपूर्णंतेव्र
स्तुवांछितं ३० इत्युक्त्वागणनाथोपितत्रैवांतरधीयत सोमदत्तोदोषमुक्तःस्वगृहंप्रत्यपद्यत ३१ भगदरःकुष्ठरोगोत्थ
न्यैदेहसमुद्भवाः तेसर्वेसोमदत्तस्यदेहात्स्वस्थानगाऽभवन् ३२ नारदउवाच एतस्मात्कारणाद्राजन्हीनांगंनव्रतंच
रेत् व्रतेंगहीनेविहितेहीनांगोजायतेनरः ३३ तस्मात्सांगव्रतंकुर्यात्सोमदत्तोयथान्यथा ३४ इतिश्रीभ० पु० नप
स्यमा० पंचत्रिंशोऽध्यायः ३५ ॐ सूतउवाच इतिहासमिमंश्रुत्वापुनःप्रोवाचभूपतिः ब्रूहिनारदभक्तायफाल्गु
नस्यकथामृतम् १ नारदउवाच अतःपरंतुराजेंद्रकथयामिकथांतरं फाल्गुनस्यसितेपक्षेषष्ठ्यांकुर्याद्दशान्हिक २
व्रतंकार्यंतुसर्वैश्चस्वस्वशक्त्यनुसारतः गाणेशैश्चापिशैवैश्चसौरैशाक्तैश्चवैष्णवैः ३ गणेशभक्तैःसततंप्रत्यहंविप्रनर्प
णं मोदकापूपलड्डुकैरेकविंशतिसंख्यया ४ कर्तव्यंतुतथाशैवैःपूर्त्यर्थंविप्रतर्पणं पक्वान्नैर्विविधैश्चैवरात्रौपूजाशिवस्य
च ५ पूर्वोक्तविधिनाकार्यंबिल्वपत्रार्पणंतथा पंचाक्षरिमंत्रजपोध्यात्वादेवंचनामभिः ६ नामानिकथयिष्यामिमंत्र
रूपाणिसुव्रत विरूपाक्षःशंकरश्चस्वयंभूर्भूत्यनाशनः ७ गंगाधरोनीलकंठोद्विजराजविभूषणः त्रिनेत्रोभूतनाथश्चपि
नाकीवृषवाहनः ८ विशेषार्घ्यंततोदद्यादेवशाक्तैश्चपूजनं कार्यंपूर्वोक्तविधिनात्रिसंध्यंमंत्रपूर्वकं ९ सौभाग्यद्र
व्याभरणैश्चंपकाशोकपुष्पकैः सततंपूजयेद्देवींततोमंत्रजपःस्मृतः १० नमोदेव्यैमहादेव्यैशिवायैसततंनमः नमः
प्रकृत्यैभद्रायैनियताःप्रणताःस्मता ११ जयंतीमंगलाकालीभद्रकालीकपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधान
मोस्तुते १२ एतयोस्तुजपः कार्योत्यष्टोत्तरशतंनृप पूजाकांडोक्तविधिनासर्वांपूजांतुकारयेत् १३ त्रयोदशेभ्योविप्रेभ्यो
दीयतांवायनानिच तावन्मितानब्राह्मणांस्तुपक्वान्नैर्भोजयेन्नृप १४ पीतचंपकपुष्पाणित्रयोदशसुनामभिः स
मर्पयेज्जगन्मात्रेनामानिकथयाम्यहं १५ विद्याप्रदाविभवदाविश्वमंगलकारिणी करुणापूर्वत्वंदयाशारदाभक्तव-

त्सला १६ एवंशाक्तैः शक्तिपूजाकार्याभक्त्यानराधिप एवंसौरैः सूर्यपूजाकार्याभक्त्यातुपूर्ववत् १७ विशेषमत्रवक्ष्या-
मिमंत्रतंत्रविधानतः अष्टचत्वारिंशतिकानर्घ्यान्दद्यात्तुमंत्रतः १८ एहिसूर्यसहस्रांशोतेजोराशिजगत्पते करवीरैर्ह्रद
शमिर्भक्त्यासूर्यंप्रपूजयेत् १९ नावह्निर्नैर्नामभिस्तुनामानिकथयाम्यहं मित्रोरविस्तथासूर्योभानुरादित्यएवच २०
प्रभाकरस्तिमिरहादिक्पतिश्चविभावसुः लोकचक्षुःकर्मसाक्षीसर्वधर्मप्रवर्तकः २१ एतैस्तुनामभिःसूर्यंपूजयेत्सा
धकोत्तमः ब्राह्मणान्भोजयेत्पश्चात्संख्ययाद्वादशोत्तमान् २२ तिलतंडुलसंमिश्रैः पद्मकाम्रैर्विधिधैरपि ततोमंत्रजपं
कुर्यादष्टार्णेभक्तितत्परः २३ अतःपरंवैष्णवैस्तुपूजनंभक्तिपूर्वकं पूर्वोक्तविधिनाकार्यंविशेषस्तत्रचोच्यते २४ पंचा-
मृतैःपूजयित्वाकोमलैस्तुलसीदलैः चतुर्विंशैर्नामभिस्तुप्रणवाद्यैर्नमोंतकैः २५ भक्त्यासमर्पयेद्वाजन्नामानिकथया
मिते केशवायनमस्तुभ्यंनमोनारायणायच २६ माधवायनमस्तुभ्यंगोविंदायनमोनमः विष्णवेचनमस्तुभ्यंमधु
सूदनवामन २७ त्रिविक्रमत्वृषीकेशदेवकीनंदवर्धन रथांगपाणेलोकेशसर्वदृक्वासवानुज २८ विश्वकर्ताविश्व
भोक्ताविश्वात्माविश्ववर्धनः त्रिलोकेशाभक्तिगम्योकर्ताहर्ताजगत्पतिः २९ सामगानरतःसौम्यःसर्वप्रहरणायुधः
एवंविष्णुंपूजयित्वाब्राह्मणान्भोजयेत्ततः ३० परमान्नैस्तुपक्वान्नैश्चतुर्विंशतिसंख्यया एवंविष्णुव्रतंकुर्याद्भवेत्पूर्ण
मनोरथाः ३१ व्रतांतेपंचभिश्चापिरात्रौजागरणंनृप यथोक्तविधिनाकार्यंविधिंतेकथयाम्यहम् ३२ इतिश्रीभ०पु०
तपस्यमा०षट्त्रिंशोऽध्यायः ३६ ७ पृथुरुवाच येनयेनप्रकर्तव्यंयथाजागरणंमुने तंविधिंश्रोतुमिच्छा
मित्वत्तोब्रह्मविदांवर १ नारदउवाच गणेशभक्तैःकर्तव्यंगणेशस्तवकीर्तनैः स्वस्वदेवस्यवेषाणांधारिणोनट
नर्तकान् २ संपूजयेच्चवस्त्राद्यैर्भूषणैर्विधिधैरपि पंचानांनैवभेदोस्तिभेदबुद्धिःपतत्यधः ३ एतस्मात्कारणात्सर्वै-
र्विष्णोश्चैवानुकीर्तनैः अवतारचरित्राणिरूपाणिविविधानिच ४ मत्स्यःकूर्मोवराहश्चनारसिंहोथवामनः जा

मदग्न्यस्तथारामोहलधारीतथैवच ५ बौद्धः कल्कीदशैवैतेकृष्णस्तुभगवान्स्वयं एतेषामवताराणांयेयेस्युरूपधारिणः ६ पुरुषास्तांस्तुपश्येतयतोविष्णुमयंजगत् दैवतैःपंचभिर्विष्णोःस्वरूपंकथ्यतेबुधैः ७ अतःसर्वैरपिजनैःकर्तव्यविष्णुपूजनम् रात्रौजागरणंकार्यंस्वस्वोपासनयाजनैः ८ विलोकनीयास्तद्देषानटानृत्यंविलोकयेत् दिवातुपूजयेत्कृष्णाराधयासहितनृप ९ माहात्म्यश्रवणंकार्यंफाल्गुनस्यातिभक्तितः माहात्म्यश्रवणेनैवपुराणोक्तफलंलभेत् १० विनोदोत्पन्नतश्चौर्यंफलकाष्टतृणादिना तत्सर्वंविलयंयातिपुराणश्रवणादिना ११ हुताशिन्याःसमुद्दिश्ययदानीतंगृहेजनैः ब्राह्मणैःसहभोक्तव्यमुद्दिश्यचैवहोलिकां १२ ज्ञाननोज्ञाननोवापिचौर्येणापहृतंजनैः पंचकेतैर्नभोक्तव्यंभुक्त्वादुःखमवाप्नुयात् १३ पंचकेतुप्रकर्तव्यंगीतहास्यविनोदनं नटनाट्यैश्चविविधैःकुशब्दैरवसर्वशः १४ अवतारादिचरितंनटेभ्यःकारयेद्बुधः एवंनिशामतिक्रम्यप्रभातेविमलेसति १५ तद्भस्मलेपनंकार्यंसर्वैर्नागरिकैर्जनैः सिंचनंपयसाकार्यंतथापंचामृतेनच १६ ततस्तुस्वपचस्पृष्ट्वातैलाभ्यंगंसमाचरेत् तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यते १७ गोमयेनोपलिप्यास्नानंसाकंसमाचरेत् एवंकृतेनसद्देहः कलिजित्वभविष्यसि १८ नारदोक्तंवचःश्रुत्वापृथुःपरमहर्षितः संपूज्यनारदंभक्त्याजग्मतुस्तौयथागतं १९ पृथुर्नारदवाक्येनचकारव्रतमुत्तमं एतद्व्रतप्रभावेणकलिदोषस्तदारुणम् २० निधूयसकलंराज्यमकरोद्भूधातले सर्वशोकविनिर्मुक्तोत्सवापपरमंसुखम् २१ एवमेवप्रकर्तव्यंशूद्रविट्क्षत्रियैर्द्विजैः अन्यथादुःखभागीस्याद्भूरदानाच्छिवस्यच २२ अत्रार्थेकथयिष्यामिइतिहासंपुरातनं पुरामगधदेशेषुमागधोनामभूपतिः २३ तस्यभार्याविशालासीत्सर्वदाकलहप्रिया नभर्तृसेवनंचक्रेनश्रृणोतिनदीरितं २४ तदात्यन्यांचोपयेमेसापिवैतादृशीभवत् नाश्रृणोद्भर्तृवचनंनचक्रेसेवनंपतेः २५ एवंदुःखाभिभूतस्यपुत्रहीनस्यभूपतेः नासीत्पुत्रोनेकयत्नैःस्त्रीभ्यांविरहितोऽभवत् २६ चकारभो

गपत्नीभ्यतनाभिःक्रीडतिनित्यशः तत्रापिदुःखंसंप्राप्तंयांचसंभुक्तवान्पृथक् २७ शत्रुभिश्चहृतंराज्यंमंभिभिश्चहृतं
धनम् भार्याभिश्चहृतंसर्वंनिर्धनःसबभूवह २८ एकाकीनिर्जनेरण्येबभ्रामसइतस्ततः केनमेदुःखनिर्मुक्तिरितिचिं
तयतेमुहुः २९ क्षुधयातृषयाक्रांतोवृक्षमूलमुपाविशत् तंदृष्ट्वाशकबालास्तुक्षुधितंचिंतयान्वितं ३० फलान्यानी
यपक्वानिददौनजगृहुःस्वयं ऊचुस्मवचनंतातस्मरधर्मसनातनम् ३१ दिवारात्रौसमायातंयोभुंक्तेत्यतिथिंविना
पापमेवाशितंतेनकृतपुण्यंविनाशितम् ३२ वृक्षस्कंधंसमारुह्यउवाचवचनंशुकः भोभोःपुत्राःसचात्मायुर्योभुंक्तेः
त्यतिथिंविना ३३ यस्त्वंवृक्षेभुक्तिहीनस्त्यंविनाममबालकाः नभक्षयंतिस्वंदुःखंनिवेदयरुपांकुरु ३४ नृपउ-
वाच नभक्षयामिवैकिंचिन्प्राणागच्छंतुवैस्फरवम् दुःखाभिभूतःसततंप्राणान्दातुंसमागतः ३५ शुकस्तु
चिंतयाविष्टोजगामगहनंवनम् नबभक्षशुकःकिंचित्स्थाप्यनीडेतुवैस्फरवम् ३६ भ्रमनादृष्टतेनसरएकंवना
तरे तत्रहंसैःसमानीयफलमूलानिकंदकान् ३७ तत्रातिथिंशुकंदृष्ट्वातैराहूतोनचागतः किंनेदुःखंसमारव्या
हितेनसर्वंनिवेदितम् ३८ एतस्मिन्नंतरेतत्रभरद्वाजःसमागतः तत्सर्वंकथयामासुःप्राणिपत्यसमंविधेः
३९ भरद्वाजंशुकोत्थेषवृक्षमूलमुपागतः सर्वेत्युपोषितास्तत्रनृपदुःखादतीवच ४० भरद्वाजउवाच
सचासीत्पूर्वजननेदेवदत्तोद्विजोत्तमः विद्यानपिहिमान्यश्चनचकारहुताशिनीम् ४१ नशंखशब्दंकृतवान्भू-
स्मगोमयजलतथा स्नानंनकृतवान्सर्वंनदायंफाल्गुनस्यच ४२ तेनदोषेणतज्जन्मक्षात्रंदुःखान्यनेकशः योवै
फाल्गुनजान्धर्मान्नकरोतिस दुःखभाक् ४३ फाल्गुनेमासितांबूलंस्तेनदत्तोद्विजन्मने तेनपुण्येनसंप्राप्तोराज्य
शुकंनिवेदय ४४ धर्मान्कारयसंपूर्णांस्तेनसंततिवर्धनम् श्रुत्वाशुकश्चहंसाश्चनृपेणसहभोजिताः ४५ज
ग्मिरेस्वगृहंसर्वेशुकविनःफाल्गुनव्रतात् ४६ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येसप्तत्रिंशोऽध्यायः ३७

ऋषयऊचुः श्रुतंमासस्यमाहात्म्यंस्नानदानजपादिकम् अधुनाश्रोतुमिच्छामोव्रतंपापप्रणाशनम् १ स्तेयाद्व्यभिचाराद्वाजातिभ्रंशात्तथैवच पातकेभ्यस्तथान्येभ्योमुच्यतेयत्कृतेसति २ सूतउवाच साधुपृष्टं महाभागाः सर्वलोकोपकारकम् होलिकाख्यंव्रतंदिव्यंफाल्गुन्यांतत्समाचरेत् ३ सर्वपापविनिर्मुक्तः शिवलोकेमहीयते ऋषयऊचुः सूतकेनविधानेनकर्तव्यंहोलिकाव्रतम् ४ तत्सर्वंश्रोतुमिच्छामः सेतिहासंसविस्तरम् सूतउवाच कुरुक्षेत्रेपुराविप्राः कुरुपांडवसैनिकैः ५ कृतंयुद्धंमहाघोरंदेवदैत्यभयंकरम् एकदाकुरुसैन्येनजितंपांडुबलंमहत् ६ तस्मिन्युद्धायप्रययौरुक्मभद्राननयोबली अभिमन्युरितिख्यातोमहाबलपराक्रमः ७ हतेषुकुरुमुख्येषुपतितः कालनोदितः पतितेर्जुनजेतस्मिन्ननोहाहाकृतंबलम् ८ हाहाकारोमहानासीत्पांडुपुत्रःसमागतः कृष्णोपिप्रययौतत्रशोकसंविग्नमानसः ९ सर्वेमिलित्वाशोचंतोनवैसांत्वयितुंक्षमाः इतिशोकाकुलेजातेपांडुसैन्येमहानिशि सत्यलोकात्समागत्यनारदोभगवान्ऋषिः १० नारदउवाच भगवन्देवदेवेशश्चंतकालयपालक ११ कालस्यापिचकालस्त्वंकिमर्थंशोचसेप्रभो गुरुपुत्रस्त्वयानीतोबहुकालंयमालयात् १२ पीतोदवाग्निःसहसालीलयास्माधरोधृतः त्रैलोक्यंदर्शितंवक्त्रेकिमर्थंशोचसेप्रभो १३ नारदस्यवचःश्रुत्वाभगवान्प्राहतत्वतः नाहंसमर्थःकस्यापिभाविनःपरिमार्जितुं १४ नाहंशिवोनाब्जयोनिर्नदेवीनचभास्करः भवितव्यप्रतीकारंकर्तुकोन्योस्तिचक्षमः १५ वंचकाःसर्वविश्वस्यविधवेद्यसमाह्वयं कर्तुंचैवान्यथाकर्तुंनसमर्थाःकदाचन १६ अवश्यंकर्मभोक्तव्यंदेवैर्दैत्यैश्चमानवैः कर्मणांपूर्वजातानांनभोगेनविनाक्षयः १७ भगवद्वाक्यमाकर्ण्यऋषिःखेदनसंयुतः विनम्रवदनोदेवंभीमसेनोजगादह १८ भीमउवाच भगवन्सर्वधर्मज्ञनानृतंत्वयाभाषितम् भवतागोकुलेपूर्वंजारकर्मकृतसदा १९ स्तेयंभ्रंशकरंवापितथान्यान्यपिसर्वशः कृतानिसर्वकर्माणिनाथकानेगतिर्भवे

त् २० श्रीभगवानुवाच साधुपृष्टंमहाभाग्लोकानुग्रहकारकं गोकुलेवसनापूर्वंकृतंसर्वंकदारुणं २१ परं नगणयांचक्रेदेवोहामिनिवैधिया कस्मिंश्चित्समयेभीमगोपैश्चपरिवारितः २२ यमुनातीरमासाद्यपारंगंतुंसमुत्सुकः नमार्गलेभिरेसर्वंजलपूर्णामहानदी २३ एतस्मिन्नंतरेतत्रदुर्वासाःसमुपागतः उवाचपुंडरीकाक्षएहित्वं ममपृष्ठतः २४ इत्युक्त्वायमुनातीरेआगत्योवाचप्रांजलिः अहंषष्टिसहस्राणांभोक्ताचान्नस्यनित्यदा २५ उपोषितश्चेन्मेमानंदेहिमार्गंचसूर्यजे दुर्वासोदीरितंश्रुत्वाहिभागारविनंदिनी २६ जगामपरतीरंसमाप्रोवाचहिजर्षभः कुरुष्वशपथंविष्णो त्वमार्गंप्रदास्यति २७ मुनिवाक्यंसमाकर्ण्यशपंथंकृतवानिति यद्यहंब्रह्मचर्येण वसामिसनतंयदि २८ सर्वभूतेषुवासश्चेद्देहिमार्गंयमस्वसः इत्याद्यनेकशपथान्कृत्वापिरविनंदिनी २९ नमार्गंप्रददौमत्यंनदाहदुःखितोभृशं त्यक्तुन्प्राणान्मतिंचक्रेतावद्वैपायनोययौ ३० पृष्ठोहंनेनकिमितिकरिष्यसिजनार्दन मयातदेनदाख्यायिस्वदुःखस्यैवकारणम् ३१ ततःसोकथयन्मत्यं होलिकायाव्रतंशुभम् कार्यंनेनप्रभावेणजातोहंवीनकल्मषः ३२ प्रभासद्रष्टुकामेनयाचितासामयासरिन् ददौमार्गंतदामत्यं होलिकायाःप्रभावतः ३३ एतदाख्यानवान्देवव्रतंद्वैपायनोमुनिः जगामस्वाश्रमव्यासः कृष्णःस्वभवनंगतः ३४ इतिश्रीभविष्यपुराणेतपस्यमाहात्म्येअष्टत्रिंशोऽध्यायः ३८ ॥ ऋषयऊचुः कथयस्वप्रसादेनपुराणस्यफलंमुनिम् सूतउवाच एकदाब्रह्मणापूर्वंपृष्टोदेवोवृषध्वजः १ पुण्यानामपिसर्वेषामल्पायासंमहत्फलम् शिवउवाच कृतेज्ञानेनलभ्यंतत्रेतायांजपतःकिल २ द्वापरेचैवतोलभ्यंपुराणश्रवणात्कलौ कलौनास्त्येवनास्त्येवपुराणश्रवणंविना ३ अष्टादशपुराणानांमोक्षःस्याच्छ्रवणेनवै अष्टादशमितावृत्याएकस्यापिहिमोक्षना ४ एकस्यश्रवणंनैवकर्तव्यंभूतिमिच्छता श्रुतस्यापिपुराणस्यश्लोकंश्लोकार्धमेवच ५ श्रोतव्यंनचचेद्भक्तिस्तदन्यं

वाहरिप्रियम् एकेनहीयतेदोषोद्वितीयेनाहिहैतकं ६ तृतीयंहूयतेदुःखंचतुर्थेनस्थिरारमा पंचषष्ठादिश्रवणात्पुत्रपौत्र
प्रपौत्रवान् ७ पशून्सपत्तिमाप्नोतिवस्कवारश्रवान्नरः सर्वतोरोगनिर्मुक्तोरुद्रादित्यत्रयोदशात् ८ मनुपंचदशद्व्यष्ट
श्रवणाच्चक्रवर्तिना देवत्वंलभतेमर्त्यः श्रवात्सप्तदशस्यच ९ अष्टादशपुराणोक्तविष्णोःप्रियनरोभवेत् श्रवणा-
लभतेमोक्षंपुराणोपपुराणतः १० तुलायांस्थापितंपुण्यंपुराणस्यविरंचिना अन्यत्रतीर्थदानानांव्रतयागादिना
तथा ११ पुराणस्यमभूद्भूरिदृष्ट्वाश्चर्यसमन्वितः १२ तदाप्रख्यातिमकरोत्पुराणेपुण्यमाधिकम् अत्रार्थेकथ
यिष्यामिइतिहासंपुरातनम् १३ स्कबुद्धबुद्धनामानौब्राह्मणौसंबभूवतुः कापिलेविदुषांश्रेष्ठौतीर्थयात्राप्रचक्र
नुः १४ एकदावद्मानौतुकस्मात्स्याद्वानिरुत्तमा केचिद्वुस्तीर्थयात्रादानानिद्विजपूजनम् १५ इष्टापूर्तानिक-
र्माणिपुराणश्रवणंपरे बुद्ध्यवकारतस्सर्वंस्वस्यकल्याणहेतवे १६ स्कबुद्धस्तुपुराणानिश्रुत्वाग्नियमेनच कालेन
निधनंप्राप्यविष्णुलोकंसमाविशत् १७ बुद्धेनस्वर्गादृष्टस्तुविष्णुलोकंगतोइति श्रोत्रवचनंबुद्धावैकुंठमानया
शुर्वै १८ स्कबुद्धउवाच अहंदूतपराधीनोममबुद्धिःपरार्थके दूताऊचुः ददस्वत्वंपुराणस्यश्रुतस्यतुवि-
भागशः १९ तेनवैकुंठवासस्यादन्यैःस्वर्गगतिःखलु दत्वाफलंपुराणस्यउभौवैकुंठमीयतुः २० ऋषयऊचुः
वद्मासस्यमाहात्म्यंपुराणस्येश्रुतेफलम् सूतउवाच साग्रपर्वंतदर्धंवापुराणंयेनवैश्रुतम् २१ सर्वैपापैर्विनि
र्मुक्तोविष्णुलोकंसगच्छति एकतःसर्वदानानितीर्थान्यायतनानिच २२ पुराणश्रवणस्यास्यकलांनार्हंतिषोडशीं
म् नारदउवाच श्रुत्वापुराणंराजेंद्रपूजयेच्चसरस्वतीम् २३ वस्त्रालंकरणैश्चैवकंचुक्याद्यैस्सुशक्तितः सप-
त्नीकंद्विजंपूज्यव्यासरूपिणमीश्वरम् २४ पादप्रक्षालनकार्यंवस्त्रालंकारभूषितम् पुष्पमालासुगंधाद्यैर्द्र
व्यैर्व्यासंप्रपूजयेत् २५ मांगल्यैर्विविधैर्वाद्यैर्नैवेद्यैर्मुखवासनैः स्वशक्त्यादक्षिणांदद्यात्पुराणोक्तफलंलभे-

न् २६ सरस्वतींचव्यासंचयःकरोतिप्रदक्षिणम् पृथ्वीप्रदक्षिणायाश्चफलमाप्नोतिनिश्चितम् २७ पृथु
स्तुपूजयामासश्रुत्वावैनारदनथा चकारफाल्गुनस्नानकलिंजित्वाचिरेणच २८ बुभुजेसकलापृथ्वीवैकुण्ठगत-
वान्शुभम् २९ इतिसूतमुखोद्गीतंश्रुत्वानेशौनकादयः सूतंचापूजयन्भक्त्याजग्मुस्तेतपसेपुनः ३० इति
श्रीभविष्योत्तरपुराणेपृथुनारदसंवादेतपस्यमाहात्म्येपुराणश्रवणफलंनामएकोनचत्वारिंशोऽध्यायः ३९
॥ श्रीमद्गोपालकृष्णार्पणमस्तु श्रीसीतारामचन्द्रार्पणमस्तु श्रीरस्तुशुभम् कल्याणमस्तु

इतिमासस्तबकेफाल्गुनमासमाहात्म्यसमाप्त.